सटीकं

गङ्गाधर शतकम्

○

लेखक:

डॉ परड्डी मल्लिकार्जुनः, एम्.ए., पिएच.डी.

साहित्यरत्नम्

कर्नाटक विश्वविद्यालय संस्कृतविभागः

धारवाड - 580003

○

प्रकाशकः

श्री जगद्गुरु गङ्गाधर धर्मप्रचारक मण्डलम्

मूरुसाविरमठः, हुब्बल्ली - 580020

दिशम्बर - 1992

श्री जगद्गुरु मूरुसाविरमठीय ग्रन्थमाला – ३२२

सटीकं
गङ्गाधर शतकम्

लेखकः

डॉ. परड्डी मल्लिकार्जुनः, एम्. ए. पिएच. डी.
साहित्यरत्नम्
कर्नाटक विश्वविद्यालय संस्कृतविभागः
धारवाड – 580 003

प्रकाशकः

श्री जगद्गुरु गङ्गाधर धर्मप्रचारक मण्डलम्
मूरुसाविरमठः, हुब्बल्ली – 580 020
दिशम्बर – 1992

Satikam Gangadhara Satakam by
Dr. Paraddi Mallikarjun
Department of Sanskrit,
Karnatak University, Dharwad - 580 003

Published by :
Sri Jagadguru Gangadhara Dharma Pracaraka Mandala,
Moorusaviramatha, Hubli - 580 020
Karnataka State (India)

© Author

First Edition : December 1992
Copies : 500

Price : Rs. Twenty Only (20/—)

Printers :
K. E. Board's Printing Press,
Dharwad - 580 001

ग्रन्थनायकः

श्री जगद्गुरु गङ्गाधर राजयोगीन्द्र महास्वामिनः

परमपूज्जानां हुब्बल्ली मूरुसाविर मठाध्यक्षाणां
श्रीमन्महाराज निरञ्जन जगद्गुरुवर्याणां
श्री गङ्गाधरराजयोगीन्द्राणां

— आशीर्वचनम् —

कर्णाटक भाषादि रचित धार्मिकाध्यात्मिक ग्रन्थानां संस्कृत शतकरूपेणानुवादं कुर्वता डॉ. परड्डी मल्लिकार्जुनेन स्वतन्त्रं संस्कृतशतकमिदं निर्मितमिति महत्संतोषविषयः। काव्य-पीयूषपानेन वर्धितोऽयं कविः देशविदेश संस्कृत पत्रिकासु स्कीय कविता अनेकाः प्रकटयित्वा सारस्वतलोके लब्धयशाश्च सुपरिचितश्च।

जगद्गुरुपदप्राप्तेः पूर्वमनन्तरं चास्माभिर्यदपि साधु कार्यं कृतं, तत्सर्वस्य प्रशंसां काव्यरीत्या कुर्वता विदुषा कवि वर्येणानेन वयं परं संतुष्टाः। यद्यत् समाजहितायावश्यकं तत्सर्वं मपि कर्तुं यथाशक्ति प्रामाणिकरीत्या प्रयतिष्यामहे। एतदर्थे कर्तॄ श्रीजगद्गुरुः गुरुसिद्धेश्वरोऽस्मानायुरारोग्य भाग्येन योजयतु।

मठाभिमानाग्रेसरं च डॉ. परड्डी मल्लिकार्जुनं श्रीगुरु सिद्धेश्वरो व्यादिति प्रार्थयामः। इति शिवम्।

— विषयानुक्रमणिका —

आशीर्वचनम्	
प्रास्ताविकम्	
सटीकं शतकं	1–101
श्लोकानुक्रमणिका	102–103

— प्रास्ताविकम् —

वर्णादिभेदं विगणय्य लोक–
मुद्धर्तुकामः शिवयोगसिन्धुः ।
जाग्रत्समाधौ निरतः सदैव
सिद्धेश्वरोऽव्याज्जगदेकबन्धुः ॥ 1 ॥

कल्याणराज्ये विफलीकृतायाः
क्रान्तेश्च पश्चात् त्रिगुणं सहस्रम् ।
संमूढचित्राः शरणाः समेत्य
बभूवुरेते सुखिनः समस्ताः ॥ 2 ॥

तदा प्रभुत्येव मठो मठानां
चूडामणिर्मानवशान्तिहेतुः ।
नानाविधैर्धर्ममुखैः प्रभेदैः
तप्नात्मनां लौकिकसौख्यसेतुः ॥ 3 ॥

तेष्वेव पीठप्रमुखेषु धन्यः
गङ्गाधराख्यो जगदेकमान्यः ।
येनास्य पीठस्य मुहुर्महत्त्वं
लोकोत्तरं भाति दिगन्तरेषु ॥ 4 ॥

सारस्वतं नीतियुतं व्रतं तत्
जगद्गुरोर्भूतलसंप्रतिष्ठा ।
सेवाव्रतं लोकहितं ततोऽस्य
श्री शम्भुपूजासदृशं सनिष्ठम् ॥ 5 ॥

न केवलं रम्यमिदं शरीरं
तदन्तरङ्गं शुचि रम्यमस्य ।
योगप्रभावप्रति पन्नशुद्धिः
लोकोपकारार्जितपूर्णसिद्धिः ॥ 6 ॥

जीर्णं मठं नूतनरम्यागात्रं
कर्तुं प्रयत्नं सफलंचकार ।
भव्यं च दिव्यं तमवेक्ष्य साधोः
हर्षं प्रयात्येव मनोऽ विकारि ॥ 7 ॥
पाण्डित्यपूर्णान् विदुषो विलोक्य
कवीन् समावर्जितलोकचित्तान् ।
समाजसेवारसिकाननेकान्
गन्धर्वविद्यानिपुणान् सुचित्तान् ॥ 8 ॥
ये चाप्यसोमप्रतिभासुमान्याः
सर्वान् गुणग्राहिसमानचित्तः ।
सम्मानयत्येति च हर्षमन्यान्
सत्पात्रदानात्सफलं हि वित्तम् ॥ 9 ॥
पूर्णज्ञनाम्ना वचनानि यानि
विरच्य विद्वद्हृदयप्रमोदम् ।
करोति पाण्डित्यकवित्वपूर्णः
कुर्वन्ति लोकोपकृति च तानि ॥
सर्वज्ञशैलीतुलनां वहन्ति ॥ 10 ॥
बोधप्रदासौ विदुषां वरेण
तद्विश्वबन्धुत्व विलोकनाय ।
श्रीवीरशैवप्रतिपादितं यत्
कृता विरक्तेन विदेशयात्रा ॥ 11 ॥
स्वान्तः सुखायापि विरच्य पूर्णान्
ग्रन्थाननेकानपि लेखयित्वा ।
लोकोपकारं बुधरञ्जनं च
तनोति कीर्ति शशिशुभ्रवर्णाम् ॥ 12 ॥

पाण्डित्यमान्यादृशमेव भाषा–
चतुष्टये प्राप्य कृतीरनेकाः ।
विरच्य सारस्वत लोकमान्यः
कोवातिरिच्येत गुरुं तमन्यः ॥ 13 ॥

काशीय विश्वेश्वर सन्निधाने
तपश्चरन् लब्ध समस्तविद्यः ।
समाजगङ्गाधर सेवयायं
भुवि प्रसिद्धो भवरोगवैद्यः ॥ 14 ॥

मतीय संघर्षमिहापवित्रं
अनार्यकृत्यं च समाज भङ्गम् ।
निरीक्ष्यसद्भिः सह पादयात्रा–
प्रसङ्गदूर कृत शान्तिभङ्गः ॥ 15 ॥

लिङ्गैकनिष्ठोऽपि समाजबन्धून्
समानदृष्ट्यादरपूर्वकं च ।
सभाजयत्यात्मबलप्रसिद्धः
सन्तोषदाने शिवयोगसिद्धिः ॥ 16 ॥

पाण्डित्यपूर्णोऽम्बुजबन्धुतीक्ष्णः
सेवाव्रती चन्द्रमयूखकान्तः ।
शिवैकनिष्ठोऽखिलविश्वबन्धुः
दिवानिशं मानवधर्म सिन्धुः ॥ 17 ॥

समुद्रमन्थोत्थं विषं हि पीत्वा
शम्भुस्तदाभून्ननु नीलकण्ठः ।
मात्सर्यहालाहलपूर्णवाणीं
श्रुण्वन् दयाढ्यो दयते कुकण्ठान् ॥ 18 ॥

मुनी रुद्रपूर्वो[1] विनम्र स्वभावः
सदासेवते यं विशक्तिप्रभावम् ।
सदा वृन्दवन्द्यो दयाक्षीरसिन्धु–
र्मठाधीशमान्यः सदा विश्वबन्धुः ॥ 19 ॥

षष्ट्यब्दपूर्तिसमये यमनन्यभक्त्या
सम्मायत्यभयदं जनतानुरक्त्या ।
लोकोपकारनिरतो विरतः प्रशान्तः
पश्येत् शतं हि शरदां शरदिन्दुकान्तः ॥ 20 ॥

सद्वृत्तमौदार्यगुणादिधन्यं
काव्यं परड्डो रचितं सुबोधम् ।
सालंकृति श्रीगुरुभवितमान्यं
भूयात्सदेदं कृतसाधुमोदम् ॥ 21 ॥

---

1. रुद्रमुनिरिति जगद्गुरोरुत्तराधिकारी ।

वेदान्तादिषु यः सदाशिव इति ख्यातः स्वयं शंकरः
येनेदं सकलं जगद् धृतमहो नानाविधं लीलया ।
अर्धांगे गिरिजां वहन् रमयते भक्तान् निजान् पालयन्
तं वन्दे शिवलिङ्गरूपिणमहं त्रैलोक्यनाथं हरम् ॥ १ ॥

ವೇದಾಂತಾದಿಷು ಯಃ ಸದಾಶಿವ ಇತಿ ಖ್ಯಾತಃ ಸ್ವಯಂ ಶಂಕರಃ
ಯೇನೇದಂ ಸಕಲಂ ಜಗದ್ ಧೃತಮಹೋ ನಾನಾವಿಧಂ ಲೀಲಯಾ ।
ಅರ್ಧಾಂಗೇ ಗಿರಿಜಾಂ ವಹನ್ ರಮಯತೇ ಭಕ್ತಾನ್ ನಿಜಾನ್ ಪಾಲಯನ್
ತಂ ವಂದೇ ಶಿವಲಿಂಗರೂಪಿಣಮಹಂ ತ್ರೈಲೋಕ್ಯನಾಥಂ ಹರಮ್ ॥ ೧ ॥

"एको रुद्रो न द्वितीयाय तस्थे" इत्यादि वेदवाक्यानि वेदान्तवचनानि च शिवं ब्रह्माभिधं मन्यन्ते । उक्तं च–

ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनो जगन्मूलं तं नमामि परं शिवम् ।।

(सिद्धान्तशिखामणि I 2)

'जन्माद्यस्य यतः' इति ब्रह्मसूत्रं वीरशैवमतानुसारं एतदेव निरूपयति । 'अर्धनारीनटेश्वरः' इति जगद्प्रसिद्धः शिवः सृष्ट्यादिजगत्त्रितयकारणमिति बाणोऽपि ब्रवीति:–

रजोजुषे जन्मनि सत्त्ववृत्तये
स्थितौ प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ।। (कादम्बरी)

स एव परशिवो लिङ्गरूपेण परिणत इति वक्तुं शक्यते । मङ्गलादीनि काव्यानीति सूक्तिमनुसृत्य शिवस्तुत्या शतकारम्भः क्रियते ।।

यल्लीलया जगदिदं सकलं ह्यतन्त्रं
सृष्टं च संभृतमहो विलयं प्रयाति।
उद्धर्तुमात्मशरणान् शिवलिङ्गरूपं
तं नौमि शंकरमुमादयितं स्वतन्त्रम् ॥ २ ॥

ಯಲ್ಲೀಲಯಾ ಜಗದಿದಂ ಸಕಲಂ ಹ್ಯತಂತ್ರಂ
ಸೃಷ್ಟಂಚ ಸಂಭೃತಮಹೋ ವಿಲಯಂ ಪ್ರಯಾತಿ।
ಉದ್ಧರ್ತುಮಾತ್ಮಶರಣಾನ್ ಶಿವಲಿಂಗರೂಪಂ
ತಂ ನೌಮಿ ಶಂಕರಮುಮಾದಯಿತಂ ಸ್ವತಂತ್ರಮ್ ॥ ೨ ॥

परतन्त्रजगत्सृष्ट्यादिकारणं शिवः शक्ति समेतः स्वतन्त्रः सन् भक्तानामनुग्रहार्थं लिङ्गरूपधारी भवतीति प्रसिद्धमागमादिषु। वेदादिभिरप्यवेद्यं लिङ्गं गुर्वनुग्रहात् शिष्यहस्ते स्थितं पूजां गृह्णाति। विषयेऽस्मिन् बसवेश्वरो ब्रवीतिः–

वेद्यं न वेदनिवहैरपि मूललिङ्गं
शास्त्रैरसाध्यमिति यत्परमात्मलिङ्गम्।
तर्कैरतर्क्यमिति यद् भुवनादिलिङ्गं
यच्चागमैरनुपलभ्यपरात्मलिङ्गम् ॥

यस्मिन् तपस्यति पुरा गुरुसिद्धराज-
योगीन्द्र इत्यभयदः शिवयोगि राजः ।
तस्मिन् स एव नगरे करुणैकसिन्धुः
जाग्रत्समाधिनिरतः शरणैकबन्धुः ॥ ३ ॥

ಯಸ್ಮಿನ್ ತಪಸ್ಯತಿ ಪುರಾ ಗುರುಸಿದ್ಧರಾಜ–
ಯೋಗೀಂದ್ರ ಇತ್ಯಭಯದ: ಶಿವಯೋಗಿರಾಜ: ।
ತಸ್ಮಿನ್ ಸ ಏವ ನಗರೇ ಕರುಣೈಕ ಸಿಂಧು:
ಜಾಗ್ರತ್ ಸಮಾಧಿ ನಿರತ: ಶರಣೈಕ ಬಂಧು: ॥ ೩ ॥

त्रिसहस्र (मूरुसाविर) मठमूलकर्तृ गुरुसिद्धराजनाम योगिराजः हुब्बल्लीति प्रथिते पट्टणे पुरा तपस्यति स्म। करुणासिन्धुर सावेव तन्मठे जाग्रत्समाधिनिरतो भूत्वाद्यापि भक्तानुग्रहं करोतीति सकलवेद्यं सर्वानुभवगम्यं च। वर्णादिनिरपेक्षे चास्मिन्मठे सर्वेऽपि कर्तृश्रीगुरुसिद्धेश्वरदर्शनकृतकृत्या भवन्ति पूर्णाभिलाषाश्च स्वगृहाणि यान्ति। या कापि प्रगतिरधुना दृग्गोचरी भवति, तन्मूलकारणं जाग्रत्समाधि निरतगुरुसिद्धेश्वर कृपैवेति वक्तुं शक्यते।

तस्मिन् तपश्चरति घोरतरं गुहायां
कल्याणराज्यशरणाः त्रिगुणं सहस्रम् ।
दिङ्मूढदीनमनसा शरणार्थमेनं
प्रापुस्ततोऽस्य भुवने सुयशःप्रसारः ॥ ४ ॥

ತಸ್ಮಿನ್ ತಪಶ್ಚರತಿ ಘೋರತರಂ ಗುಹಾಯಾಂ
ಕಲ್ಯಾಣರಾಜ್ಯಶರಣಾಃ ತ್ರಿಗುಣಂ ಸಹಸ್ರಮ್ ।
ದಿಙ್ಮೂಢದೀನಮನಸಾ ಶರಣಾರ್ಥಮೇನಂ
ಪ್ರಾಪುಸ್ತತೋಽಸ್ಯ ಭುವನೇ ಸುಯಶಃ ಪ್ರಸಾರಃ ॥ ೪ ॥

द्वादशशतमाने वर्तमानोऽसौ शिवयोगी कस्यांचन गुहायां यदा घोरं तपश्चरति स्म, तदैव कल्याणक्रान्तिऽसपन्ना, येन त्रिसहस्र संख्याका शिवशरणा दिङ्मूढमनस एनं शरणं यान्तीति पौराणिकी कथा। अत एवास्य मठस्य कीर्तिः मूरुसाविर (त्रिसहस्र) मठ इति लोकाविश्रुता भवति।

वर्णाश्रमादिगणनाविमुखो मठोऽसौ
भक्तोपकारनिरतः कृतसर्वतोषः ।
येन स्वयं जगति वाक्यमिदं प्रमाणं
'साधुः सदा भवति विश्वकुटुम्बमान्यः' ॥ ५ ॥

ವರ್ಣಾಶ್ರಮಾದಿಗಣನಾವಿಮುಖೋ ಮಠೋಽಸೌ
ಭಕ್ತೋಪಕಾರನಿರತಃ ಕೃತಸರ್ವತೋಷಃ ।
ಯೇನ ಸ್ವಯಂ ಜಗತಿ ವಾಕ್ಯಮಿದಂ ಪ್ರಮಾಣಂ
'ಸಾಧುಃ ಸದಾ ಭವತಿ ವಿಶ್ವಕುಟುಂಬ ಮಾನ್ಯಃ ॥ ೫ ॥

यद्यपि मठस्यास्य मूलपुरुषो वीरशैवमतावलम्बी शिवयोग धुरन्धरस्तथापि वर्णाश्रमलिङ्गादिविमुखऽस्मिन् मठे सर्वेऽपि समानतया कर्तृसमाधिदर्शनेन धन्यतां यान्ति। सर्वधर्म-समन्वयोऽत्रानुभूयते। अनेन जगद्गुरोः विश्वकुटुम्बभावस्य प्रमाणं व्यक्तीभवति। उक्तं च सुभाषितकारेण–

अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

भव्यं न केवलमहो भवनं मठाख्यं
प्राचीनधर्मपरिरक्षणकेन्द्रमुख्यम् ।
सन्मार्गदर्शनपरो मनुसन्ततेर्यद्
बाबूप्रसादगदितं मठमेनमेत्य ॥ ६ ॥

ಭವ್ಯಂ ನ ಕೇವಲಮಹೋ ಭವನಂ ಮಠಾಖ್ಯಂ
ಪ್ರಾಚೀನ ಧರ್ಮ ಪರಿರಕ್ಷಣ ಕೇಂದ್ರ ಮುಖ್ಯಂ ।
ಸನ್ಮಾರ್ಗದರ್ಶನಪರೋ ಮನುಸಂತತೇರ್ಯದ್
ಬಾಬೂ ಪ್ರಸಾದ ಗದಿತಂ ಮಠಮೇನಮೇತ್ಯ ॥ ೬ ॥

न केवलमस्य भवनं भव्यं, किन्तु परम्पराप्यस्य भव्या । भारतीय संस्कृति भव्यपरम्परायाः रक्षणे मठोऽयं कटिबद्ध इति मठमेनमेत्य स्वतन्त्रभारतराष्ट्रस्य प्रथमराष्ट्रपतिबाबूराजेन्द्रप्रसाद यदुक्तवान्, तत्सर्वं सदा स्मरणीयम् ।

तेष्वेव पीठपतिषु प्रमुखेषु नूनं
गंगाधराख्यशिवयोगिवरेण्य एकः।
यस्य प्रकांडविदुषो जनतानुरागात्
दीनोपचारपरता शिवपूजनं तत् **॥ ७ ॥**

ತೇಷ್ವೇವ ಪೀಠಪತಿಷು ಪ್ರಮುಖೇಷು ನೂನಂ
ಗಂಗಾಧರಾಖ್ಯ ಶಿವಯೋಗಿ ವರೇಣ್ಯ ಏಕಃ ।
ಯಸ್ಯ ಪ್ರಕಾಂಡ ವಿದುಷೋ ಜನತಾನುರಾಗಾತ್
ದೀನೋಪಚಾರ ಪರತಾ ಶಿವಪೂಜನಂ ತತ್ ॥ ೭ ॥

तेषु नैकेषु जगद्गुरुपदारूढेषु गंगाधराख्य शिवयोगीश्वर एकः। प्रकाण्डपण्डितोऽपि जनतानुरागी सन् दीनोपचारनिरत आसीत्। दीनानां सेवैव लिङ्गपूजनमिति मत्वाहोरात्रं तद्दीनजनोपचारपरः सन् पीठाधिपतीनामादर्शप्राय आसीदिति वक्तुं शक्यते। काशीविद्यापीठाद् व्याकरणशास्त्रवैदुष्यं प्राप्य पुनरागतोजगद्गुरुपदे नियुक्तोऽपि समाजसेवाविमुखो नाभवत्। यतः समाज सेवैक शिवप्रसाद कारणमिति तस्य विचारसरणिरासीत्। कर्णाटकराज्ये प्रथमतया धर्मतरङ्गिणीति मासपत्रिकाद्वारा समाजसेवोन्मुख आसीत्।

पश्चाद् जगद्गुरुपदे गुरुसिद्धराज-
योगी व्यराजत महापुरुषाग्रगण्यः।
शिक्षाप्रसाररसिको यतिवृन्दराजः
विद्यालयादिरचनादृढदीक्षितोऽभूत् ॥ ८ ॥

ಪಶ್ಚಾದ್ ಜಗದ್ಗುರು ಪದೇ ಗುರುಸಿದ್ಧ ರಾಜ-
ಯೋಗೀ ವ್ಯರಾಜತ ಮಹಾಪುರುಷಾಗ್ರ ಗಣ್ಯ: ।
ಶಿಕ್ಷಾ ಪ್ರಸಾರ ರಸಿಕೋ ಯತಿ ವೃಂದರಾಜ:
ವಿದ್ಯಾಲಯಾದಿ ರಚನಾದೃಢ ದೀಕ್ಷಿತೋಽಭೂತ್ ॥ ೮ ॥

गङ्गाधर राजयोगीन्द्रानन्तर गुरुसिद्धराज योगीन्द्र इति ख्यातो जगद्गुरुरभवत्। योगिराजोऽपि शिक्षाप्रसाररसिकतयानेक शिक्षणसंस्थास्थापनं कृत्वा वाणिज्यकेन्द्रभूतमिदं नगरं शिक्षण-केन्द्रभूतमकरोदिति शक्यते वक्तुम्। कायेन मनसा वित्तेनच नगरस्यास्य सर्वतोमुखाभिवृद्धिकृते सततं प्रयत्नमकरोत्। श्रीकाडसिद्धेश्वरकलाविद्यालयस्य श्री गङ्गाधरवाणिज्य माहा-विद्यालयस्य स्थापनाकार्येऽस्योदारतैव कारणमिति सकलवेद्यम्। विद्यार्थिनिलयादिस्थापनमग्नोऽपि घटप्रभानगरे श्रीजगद्गुरु गुरुसिद्धेश्वर रुग्णालयस्थापने कृतमतिरासीत्। तस्मिन् कार्ये सफलोऽप्यभवत्। शिवयोगमन्दिराख्यशिवानुभवसंस्थाया आध्यक्ष्ये विराजमानोऽयं जगद्गुरुगङ्गाधरधर्मप्रचारक मण्डलस्यच स्थापनं कृत्वा वीरशैवधर्मजाग्रतिमग्नोऽभवत्।

वाणिज्यकेन्द्रगणनाप्रमुखे पुरेऽस्मिन्
शिक्षाप्रसारविषये विमुखान् समस्तान् ।
वीक्ष्य स्वयं दृढमतिर्गुरुसिद्धयोगी
विद्याप्रसाररसिकप्रमुखः प्रसन्नः ॥ ९ ॥

ವಾಣಿಜ್ಯ ಕೇಂದ್ರ ಗಣನಾಪ್ರಮುಖೇ ಪುರೇಽಸ್ಮಿನ್
ಶಿಕ್ಷಾ ಪ್ರಸಾರ ವಿಷಯೇ ವಿಮುಖಾನ್ ಸಮಸ್ತಾನ್ ।
ವೀಕ್ಷ್ಯ ಸ್ವಯಂ ದೃಢಮತಿರ್ಗುರುಸಿದ್ಧಯೋಗೀ
ವಿದ್ಯಾಪ್ರಸಾರ ರಸಿಕ ಪ್ರಮುಖಃ ಪ್ರಸನ್ನಃ ॥ ೯ ॥

पूर्वमेवोक्तं यदस्मिन् पूरे विद्याप्रसार (प्रचार) विषयेऽनास्था जनानामासीत्, यतस्ते वणिजः। अत एव विद्याप्रचार रसिकता धुरीणो भूत्वा विद्याकेन्द्रछात्रनिवासादि निर्माणे कृतमतिर्बद्ध कंकणोऽभवत् ।

संपद्भरप्रथित एष मठः प्रथिव्यां
अर्थप्रतीकरघुवत् कृतदानयज्ञः ।
अर्थार्जनं क्षितितले जनतोपकार-
संपादनेन सफलं विफलं तदन्यत् ॥ १० ॥

ಸಂಪದ್‌ಭರಪ್ರಥಿತ ಏಷ ಮಠಃ ಪೃಥಿವ್ಯಾಂ
ಅರ್ಥಪ್ರತೀಕ ರಘುವತ್ ಕೃತದಾನಯಜ್ಞಃ ।
ಅರ್ಥಾರ್ಜನಂ ಕ್ಷಿತಿತಲೇ ಜನತೋಪಕಾರ-
ಸಂಪಾದನೇನ ಸಫಲಂ ವಿಫಲಂ ತದನ್ಯತ್ ॥ ೧೦ ॥

रघुनायकवर्णनाप्रसङ्गे रघुवंशे कविकुलगुरुणा कालिदासेनोक्तं 'त्यागाय संभृतार्थानाम्' इति। एतदेव दिलीपवर्णनावसरे विशदीकृतम्-

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसान् रविः ॥

किन्तु अर्थप्रयोजनरूपत्यागविषये रघुणा कृतमद्भुतं वीक्ष्य रघुमहाराजमेव अर्थप्रतीक इति मन्यन्ते। जनतोपकारार्थमेव वित्तार्जनमिति नीतिविदामभिमतम्। 'धनं दानाय' इति जगद्गुरुपदे स्थितैः राजयोगिभिः सम्यक् साधितं स्वजीवितकाल एव। अन्यथा धनार्जनं निष्फलमिति स्वयंवेद्यम्।

श्रीचित्रगीपरमपीठपतेः सुवंश्यः
श्रीमन्महान्तयतिराडिति लब्धवर्णः ।
श्रीमन्निरञ्जनजगद्गुरुतामुपेत्य
गङ्गाधराह्वय जगत्प्रथितःप्रसन्न ॥ ११ ॥

ಶ್ರೀ ಚಿತ್ರಗೀ ಪರಮಪೀಠಪತೇಃ ಸುವಂಶ್ಯಃ
ಶ್ರೀ ಮನ್ಮಹಾಂತ ಯತಿರಾಡಿತಿ ಲಬ್ಧವರ್ಣಃ ।
ಶ್ರೀ ಮನ್ನಿರಂಜನ ಜಗದ್ಗುರು ತಾಮುಪೇತ್ಯ
ಗಂಗಾಧರಾ ಹ್ವಯಃ ಜಗತ್ ಪ್ರಥಿತಃ ಪ್ರಸನ್ನಃ ॥ ೧೧ ॥

श्रीजगद्गुरुपूज्य पादानां जन्म चित्रगी महान्त शिवयोगिनामेव कुले (पूर्वाश्रमे) ऽभवत् । हानगल्ल श्री कुमारस्वामिनामाशीर्वाद-जाता एते सूर्यवत्तेजःपुञ्जा इत्यत्र को विशेषः। क्रिस्ताब्दस्य १९५५ तमाद् वर्षाद् चित्रगीपीठाध्यक्षपदे नियुक्ता विजय महान्तदेवा इति प्रथिताः। मूरुसाविरमठाध्यक्षाणां जगद्गुरु वर्याणां गुरुसिद्धराजयोगीन्द्राणामभिलाषया १९५८ तमे वर्षे जगद्गुरुपीठारोहणं कृत्वा जगद्गुरुगङ्गाधरराजयोगीन्द्र नाम्ना जगत्प्रसिद्धा अभवन् ।

बाल्ये यतः शिवमताध्ययनैकसक्तः
श्रीयोगमन्दिरमुदारमुपेत्य शैवम् ।
आसीच्च योगनिपुणो भवतापहारि-
श्रीवीरशैवमततत्त्वविदां प्रधानः ॥ १२ ॥

ಬಾಲ್ಯೇಯತಃ ಶಿವಮತಾಧ್ಯಯನೈಕಸಕ್ತಃ
ಶ್ರೀ ಯೋಗಮಂದಿರಮುದಾರಮುಪೇತ್ಯ ಶೈವಮ್ ।
ಆಸೀಚ್ಚ ಯೋಗ ನಿಪುಣೋ ಭವತಾಪಹಾರಿ-
ಶ್ರೀ ವೀರಶೈವ ಮತತತ್ತ್ವವಿದಾಂ ಪ್ರಧಾನಃ ॥ ೧೨ ॥

पूर्वाश्रमे महान्तेशनाम्ना प्रथित बाल्येऽर्थात् पंचवर्षमिते आयुष्येव पितृनियुक्ता शिवयोगमन्दिरमुदारमागत्य भाषाध्ययनेन सार्धमेव योगनिपुणा अभवन्। कवितादि लेखनरसिकानपि वीरशैव मततत्त्वज्ञानेऽपि निपुणा आसन्। कस्यचन कवेरिदं वाक्यं एतेषां जगद्गुरु दर्पाणां विषये सार्थकं भवति–

काव्येषु कोमलधियो वयमेव नान्ये।
तर्के तु कर्कशधियो वयमेव नान्ये ॥

काशीं गतोऽध्ययनशीलमना: समोदं
प्रापोन्नतं पदमुदारमति: सलीलम् ।
विद्यार्जनैकमनसा चतुराग्रगण्य:
नायासमेति बहुधा पदवीधरत्वे ॥ १३ ॥

ಕಾಶೀಂ ಗತೋಽಧ್ಯಯನ ಶೀಲಮನಾ: ಸಮೋದಂ
ಪ್ರಾಪೋನ್ನತಂ ಪದಮುದಾರಮತಿ: ಸಲೀಲಮ್ ।
ವಿದ್ಯಾರ್ಜನೈಕ ಮನಸಾ ಚತುರಾಗ್ರಗಣ್ಯ:
ನಾಯಾಸಮೇತಿ ಬಹುಧಾ ಪದವೀಧರತ್ವೇ ॥ ೧೩ ॥

अष्टवर्षकालपर्यन्तं काशीवासमुपेत्य ज्ञानार्जने दत्तमतिर विश्रान्तमध्ययशीला: अभवन् । उक्तं चान्यत्र-

विद्यार्थिन: कुत: सौख्यं ।
सुखार्थिन: कुतो विद्या ।।

पदवीप्राप्तिविषये कदापि नायासं प्रयान्ति स्म । विद्वत् प्रभावितेन विश्वविद्यानिलयेन छात्रवेतनं तेभ्य: दत्तम् । कलकत्ता विश्वविद्यालयात् काव्यतीर्थपदवीं ढाका विश्वविद्यालयात् 'साहित्यरत्न' पदवीं बनारसहिन्दूविश्वविद्यालयात् 'वेदान्ताचार्य' पदवीं प्राप्य भाषाचतुष्टयेऽपि तत्त्वज्ञानादिविषयेष्वपि नितरां निष्णाता: अभवन् ।

गीर्वाणवाक्परिणतो ननु मातृभाषा-
पाण्डित्यमेत्य पुनराङ्ग्लवचःप्रवीणः ।
हिन्दीवचस्यनुपमे कृतयत्न एषः
लोकोत्तरो भवति पण्डितराजशाणः ॥ १४ ॥

ಗೀರ್ವಾಣವಾಕ್ ಪರಿಣತೋ ನನು ಮಾತೃಭಾಷಾ-
ಪಾಂಡಿತ್ಯಮೇತ್ಯ ಪುನರಾಂಗ್ಲವಚಃ ಪ್ರವೀಣಃ ।
ಹಿಂದೀವಚಸ್ಯನುಪಮೇ ಕೃತಯತ್ನ ಏಷಃ
ಲೋಕೋತ್ತರೋ ಭವತಿ ಪಂಡಿತ ರಾಜಶಾಣಃ ॥ ೧೪ ॥

यस्मिन् पाण्डित्यमनुपमं तैः प्राप्तं, तद्भाषाचतुष्टयमत्र निरूप्यते। मातृभाषा कन्नडभारत्यां बाल्यादेव परिणताः सन्तः कृतानेकरचना सन्ति। संस्कृताध्ययनात् वीरशैवमतमूलग्रन्थानां शिवागमानां परिचयेन तत्त्वशास्त्रप्रविणाः हिन्दी भाषा वैदुष्य भूषिता आङ्ग्ल भाषा निपुणाः भूत्वा तेषु सर्वेषु माध्यमेषु नैकग्रन्थरचनां कृतवन्त एतेऽत्रभवन्तः पण्डितानां शाण इव प्रतिभान्ति।

साहित्यनिर्मितिमुदारमतिः स बाल्ये
प्रारब्धवानिति यदा समुदं विचार्यम् ।
योगप्रशान्ततनुचित्तगुणाग्रगण्य-
श्चारित्र्यदर्शनमहो भविता सलीलम् । ॥ १५ ॥

ಸಾಹಿತ್ಯನಿರ್ಮಿತಿ ಮುದಾರಮತಿ: ಸ ಬಾಲ್ಯೇ
ಪ್ರಾರಬ್ಧವಾನಿತಿ ಯದಾ ಸಮುದಂ ವಿಚಾರ್ಯಮ್ ।
ಯೋಗಪ್ರಶಾಂತ ತನುಚಿತ್ತ ಗುಣಾಗ್ರಗಣ್ಯ-
ಶ್ಚಾರಿತ್ರ್ಯ ದರ್ಶನಮಹೋ ಭವಿತಾ ಸಲೀಲಮ್ ॥ ೧೫ ॥

शिवयोगमन्दिरेऽध्ययनावसरे मातृभाषादि भाषाचतुष्टयप्रौढिमां प्राप्तवान्, साहित्यरचनाचातुरीमपि प्रकटितवान्। बाल्यात्प्रभृति काव्यलेखनादिरचनानिपुणोऽसौ जगद्गुरुः 'सुकुमार' नामक पत्रिकासंपादकोऽप्यभवदिति महाश्चर्यकरम्। योगाभ्यासात्तनु-शुद्धि, मनःशान्तिं प्रशान्तगुणत्वं च लब्ध्वा सम्यक्चारित्र्य दर्शनं प्रकटितवान् ।

चित्ते सदा परमलक्ष्यमिदं विधाय
साहित्यसृष्टिनिरतः शिवलिङ्गनिष्ठः ।
काव्योपचाररसिकः कृतशम्भुतुष्टिः
लोकप्रमोदकरणं शिवपूजनं तत् । ॥ १६ ॥

ಚಿತ್ತೇ ಸದಾ ಪರಮಲಕ್ಷ್ಯಮಿದಂ ವಿಧಾಯ
ಸಾಹಿತ್ಯ ಸೃಷ್ಟಿ ನಿರತಃ ಶಿವಲಿಂಗ ನಿಷ್ಠಃ
ಕಾವ್ಯೋಪಚಾರರಸಿಕಃ ಕೃತಶಂಭುತುಷ್ಟಿಃ
ಲೋಕಪ್ರಮೋದಕರಣಂ ಶಿವಪೂಜನಂ ತತ್ ॥ ೧೬ ॥

'शिवस्य तद्भक्ततते र्विरच्य
कृतीरनेकाः विबुधप्रणुत्याः ।
शिवस्य सायुज्यमिह प्रपन्नः
हरीश्वरस्तेन समः कविः कः'

इति षडक्षरदेववचनानुसारं धार्मिक नैतिक पारमार्थिक कृति रचनामेव परमलक्ष्यमिति मत्वा तामेव शिवपूजनं तथैव जनतुष्टिरिति मनुते । केनापि साधु भणितम्–

सन्तोषं जनयेत्प्राज्ञस्तदेवेश्वर पूजनम् ।।

श्रीचित्रगीपरमपीठवटुर्विरक्तः
यो वा महान्तयतिराडिति कीर्तिपात्रम् ।
पश्चात्तमेव निजपीठपतिं विधातुं
चक्रे मतिं गुरुवरो गुरुसिद्धराजः ॥ १७ ॥

ಶ್ರೀ ಚಿತ್ರಗೀಪರಮ ಪೀಠವಟುರ್ವಿರಕ್ತಃ
ಯೋ ವಾ ಮಹಾಂತಯತಿರಾಡಿತಿ ಕೀರ್ತಿಪಾತ್ರಮ್ ।
ಪಶ್ಚಾತ್ತಮೇವ ನಿಜಪೀಠಪತಿಂ ವಿಧಾತುಂ
ಚಕ್ರೇ ಮತಿಂ ಗುರುವರೋ ಗುರುಸಿದ್ಧರಾಜಃ ॥ ೧೭ ॥

इलकल्लचित्रगीपीठवटुरयं पश्चात् महान्तयतिनाम्ना पीठाधिपतिर्नियुक्तः। तमेव महान्तस्वामिनं मूरुसाविरमठाध्यक्षपदे नियोक्तुं पीठाधिपतिः गुरुसिद्धराजो मतिं चकार।

यश्चात्मलाभनिरतो विरतः शरीरे
विद्यार्जने दृढमतिर्जडताविदूरः ।
सौख्यप्रसिद्धविषये विषयेऽनपेक्षः
लक्ष्मीरुपैति दिरतं सुरतं विहाय ॥ १८ ॥

ಯಶ್ಚಾತ್ಮಲಾಭನಿರತೋ ವಿರತಃ ಶರೀರೇ
ವಿದ್ಯಾರ್ಜನೇ ದೃಢಮತಿರ್ಜಡತಾವಿದೂರಃ ।
ಸೌಖ್ಯಪ್ರಸಿದ್ಧ ವಿಷಯೇ ವಿಷಯೇಽನಪೇಕ್ಷಃ
ಲಕ್ಷ್ಮೀರುಪೈತಿ ವಿರತಂ ಸುರತಂ ವಿಹಾಯ ॥ ೧೮ ॥

जाड्यविदूरो विद्यार्जनरसिकः सन् स्वशरीरसौख्यादिषु निरपेक्षा आत्मलाभ निरतः। अत एव कामनाविदूरं तमेव जगद्गुरु पदप्राप्तिरूपा लक्ष्मीरुपेतेति वक्तुं शक्यते। विरतमतः सुदुर्लभं मानवमेव लक्ष्मीरुपैति, न सुरतम्।

आङ्ग्लादिनैकवचनप्रभुतामुपेत्य
लोकोपकार निरतो विरतः स्वसौख्ये ।
भाषाप्रबन्धरचनारसिकः स्वयं सन्
प्रोत्साहनं च कुरुते विदुषां प्रसन्नः ॥ १९ ॥

ಆಂಗ್ಲಾದಿನೈಕವಚನಪ್ರಭುತಾಮುಪೇತ್ಯ
ಲೋಕೋಪಕಾರನಿರತೋ ವಿರತಃ ಸ್ವಸೌಖ್ಯೇ ।
ಭಾಷಾಪ್ರಬಂಧ ರಚನಾ ರಸಿಕಃ ಸ್ವಯಂ ಸನ್
ಪ್ರೋತ್ಸಾಹನಂ ಚ ಕುರುತೇ ವಿದುಷಾಂ ಪ್ರಸನ್ನಃ ॥ ೧೯ ॥

स्वसौख्यविरतोऽयं परोपकारनिरतः भाषाचतुष्टयप्रवीण स्तन्माध्यमेन ग्रन्थरचनां कुर्वन् विदुषां कृतिरचना दृढचित्तानां प्रोत्साहनं कुरुते । 'विद्वानेव विजानाति विद्वज्जन परिश्रमम्' इति नीतिरस्मिन् सार्थकतां भजते ।

पाण्डित्यपूर्णविभवो भवभक्तिपूर्णः
योगप्रभावसहितः सहितो जनस्य ।
वित्तं हि लोकहितकारणमित्यवश्यं
अर्थप्रतीक रघुभूपतिमन्वगच्छत् ॥ २० ॥

ಪಾಂಡಿತ್ಯಪೂರ್ಣವಿಭವೋ ಭವಭಕ್ತಿಪೂರ್ಣಃ
ಯೋಗಪ್ರಭಾವಸಹಿತಃ ಸಹಿತೋ ಜನಸ್ಯ ।
ವಿತ್ತಂ ಹಿ ಲೋಕಹಿತಕಾರಣಮಿತ್ಯವಶ್ಯಂ
ಅರ್ಥಪ್ರತೀಕ ರಘುಭೂಪತಿಮನ್ವಗಚ್ಛತ್ ॥ ೨೦ ॥

जनस्य हितमिच्छन् सर्वमपि वित्त लोकहिताय योजयन् विश्वजिद्यागे सर्वस्वमपि सत्पात्रेभ्यो दत्वा अर्थप्रतीकभूतं रघुमङ्गारजमनुकरोऽयसाविति वक्तुं शक्यते ।

श्रीवीरशैवमतमण्डनयोगगेहं
संस्थापितं यतिवरेण कुमारनाम्ना ।
अध्यक्षपीठममलं वहता तदीयं
यत्साधितं गुरुवरेण भुवि प्रसिद्धम् ॥ २१ ॥

ಶ್ರೀ ವೀರಶೈವಮತ ಮಂಡನಯೋಗಗೇಹಂ
ಸಂಸ್ಥಾಪಿತಂ ಯತಿವರೇಣ ಕುಮಾರನಾಮ್ನಾ ।
ಅಧ್ಯಕ್ಷ ಪೀಠಮಮಲಂ ವಹತಾ ತದೀಯಂ
ಯತ್ಸಾಧಿತಂ ಗುರುವರೇಣ ಭುವಿ ಪ್ರಸಿದ್ಧಮ್ ॥ ೨೧ ॥

वीरशैवसिद्धान्तं शिवयोग इत्यपि विश्रुतम् । तत्प्रचारार्थं वटूनां साधकानां मठाधिपतीनां चावश्यकतां समवलोक्य परमपूज्य लिङ्गैक्य हानगल्लकुमारयोगिराजेन शिवयोगमन्दिरस्थापनं कृतमिति सर्वेषां विदितमेव । तत्संस्थाया अध्यक्षपदं परमपावनं वहता जगद्गुरुणा यत्साधितं तज्जगत्प्रसिद्धम् ।

अल्पे वयस्यतुलशक्तियुतेन तेन
सद्भक्तवृन्दसहितेन सपण्डितेन ।
यत्साधितं सकललोकनुतं पवित्रं
संघे सतां भवति शक्तिरिति प्रमाणम् ॥ २२ ॥

ಅಲ್ಪೇ ವಯಸ್ಯತುಲಶಕ್ತಿಯುತೇನ ತೇನ
ಸದ್‌ಭಕ್ತಸಹಿತೇನ ಸಪಂಡಿತೇನ ।
ಯತ್‌ಸಾಧಿತಂ ಸಕಲಲೋಕನುತಂ ಪವಿತ್ರಂ
ಸಂಘೇಸತಾಂ ಭವತಿ ಶಕ್ತಿರಿತಿ ಪ್ರಮಾಣಮ್ ॥ ೨೨ ॥

सद्भक्तानां पण्डितानांच सहाय्येन मठजीर्णोद्धारपुस्तकप्रकाशन धर्मप्रचारादि यद्यत्पवित्रं कार्यं साधितं 'सङ्घ शक्ति' प्रमाणं भवतीति वक्तुं शक्यते । 'संघे शक्तिः कलौ युगे' संहतिः कार्यसाधिका इत्यादि सुभाषितानि तदेव साधयन्ति ।

तज्जीर्णमन्दिरनवीकरणप्रवृत्तः
तस्यार्थिकस्थितिदृढीकरण प्रयत्नः।
तद्भूमिधान्यधनवृद्धिकृतैकयत्नः
श्रीवीरशैवमतमान्यतमं समस्तम् ॥ २३ ॥

ತಜ್ಜೀರ್ಣಮಂದಿರ ನವೀಕರಣ ಪ್ರವೃತ್ತ:
ತಸ್ಯಾರ್ಥಿಕ ಸ್ಥಿತಿ ದೃಢೀಕರಣ ಪ್ರಯತ್ನ: ।
ತದ್‌ಭೂಮಿಧಾನ್ಯಧನ ವೃದ್ಧಿ ಕೃತೈಕಯತ್ನ:
ಶ್ರೀ ವೀರಶೈವ ಮತಮಾನ್ಯತಮಂ ಸಮಸ್ತಮ್ ॥ ೨೩ ॥

जीर्णमठनवीकरण- तदार्थिकस्थितिदृढीकरण- तद्भूमि धान्यादि वृद्धिकरणादि समस्तमपि जगद्गुरुकृतं सकलवीरशैवमठाधीशानामादर्शप्रायं भवति।

श्रीरामकृष्णनिलयोपममद्य कर्तुं
श्रीयोगमन्दिरमुदारमतिर्यतीन्द्रः ।
यत्नं करोति नितरामितरानपेक्षः
अन्यादृशास्य सरणी शिवधर्मवृद्धेः ॥ २४ ॥

ಶ್ರೀ ರಾಮಕೃಷ್ಣನಿಲಯೋಪಮಮದ್ಯ ಕರ್ತುಂ
ಶ್ರೀ ಯೋಗಮಂದಿರಮುದಾರಮತಿರ್ಯತೀಂದ್ರಃ ॥
ಯತ್ನಂ ಕರೋತಿ ನಿತರಾಮಿತರಾನಪೇಕ್ಷಃ
ಅನ್ಯಾದೃಶಾಸ್ಯ ಸರಣೀ ಶಿವಧರ್ಮ ವೃದ್ಧೇಃ ॥ ೨೪ ॥

श्रीरामकृष्णप्रचारसमितिर्येनैव पथा श्रीरामकृष्णतत्त्वप्रचारं करोति तेनैवासौ जगद्गुरुः वीरशैवमतप्रचारप्रयत्नशीलः जगद्गुरु गङ्गाधर धर्म प्रचारकमण्डलादि द्वारा पुस्तक प्रकाशन द्वाराच धर्मजागृतिं करोति।

दारिद्र्यपीडितजनस्य रुजं हि दृष्ट्वा
संतप्तमस्य हृदयं जगदेकबन्धोः।
तत्स्वास्थ्यलाभरसिकः करुणैकसिन्धुः
रोगोपचारनिलयप्रतिपादकोऽभूत् ॥ २५ ॥

ದಾರಿದ್ರ್ಯಪೀಡಿತಜನಸ್ಯ ರುಜಂ ಹಿ ದೃಷ್ಟ್ವಾ
ಸಂತಪ್ತಮಸ್ಯ ಹೃದಯಂ ಜಗದೇಕಬಂಧೋಃ ।
ತತ್ಸ್ವಾಸ್ಥ್ಯಲಾಭರಸಿಕಃ ಕರುಣೈಕ ಸಿಂಧುಃ
ರೋಗೋಪಚಾರ ನಿಲಯ ಪ್ರತಿಪಾದಕೋಽಭೂತ್ ॥ ೨೬ ॥

दरिद्रजनतायां रुजमन्यादृशां वीक्ष्य घटप्रभानगरे निसर्गरम्य प्रदेशे रोगोपचारार्थमेकं शुश्रूषागृहं सहकारतत्त्वाधारेण स्थापयित्वा, स्वगुरोः जगद्गुरुसिद्धेश्वरस्य मनोऽभिलाषापूरणमकरोत्तेनास्य दीनजनतां प्रति करुण्याभावः प्रकटी भवति ।

जीर्णं मठं समवलोक्य सुधीश्च नैक–
लक्षात्मकद्रविणसद्व्ययतः पुनस्तत् ।
नावीन्यपूर्णमकरोत्सदलंकृतं च
येनास्य शक्तिरतुला भुवनप्रसिद्धा ॥ २६ ॥

ಜೀರ್ಣಂ ಮಠಂ ಸಮವಲೋಕ್ಯ ಸುಧೀಶ್ಚ ನೈಕ
ಲಕ್ಷಾತ್ಮಕ ದ್ರವಿಣಸದ್ವ್ಯಯತಃ ಪುನಸ್ತತ್ ।
ನಾವೀನ್ಯಪೂರ್ಣಮಕರೋತ್ ಸದಲಂಕೃತಂಚ
ಯೇನಾಸ್ಯ ಶಕ್ತಿರತುಲಾ ಭುವನಪ್ರಸಿದ್ಧಾ ॥ ೨೬ ॥

काले बहुतिथौ गते मठमिद जीर्णमभवत्। तद्दयनीयावस्थां वीक्ष्य व्यथितचेताः नवीनमलङ्कृतंच कृत्वा स्वीयामतुलां शक्ति दर्शयति स्म। अधुनालंकृतं मठमिदं भव्यमवलोक्य सर्वेऽपि जनाः विस्मयं परमाप्नुवन्तीति शक्यते वक्तुम् ।

वित्तादिहीनजनताहितकारिणेमं
कल्याणमण्टपमुदारधिया विरच्य।
लोकोपकाररसिकप्रमुखत्वमेत्य
कीर्तिः प्रसन्नमनसानुपमा हि लब्धा ॥ २७ ॥

ವಿತ್ತಾದಿಹೀನ ಜನತಾಹಿತಕಾಣೇಮಂ
ಕಲ್ಯಾಣ ಮಂಟಪ ಮುದಾರಧಿಯಾ ವಿರಚ್ಯ ।
ಲೋಕೋಪಕಾರ ರಸಿಕ ಪ್ರಮುಖತ್ವಮೇತ್ಯ
ಕೀರ್ತಿ: ಪ್ರಸನ್ನಮನಸಾನುಪಮಾಹಿ ಲಬ್ಧಾ ॥ ೨೭ ॥

श्रीसामन्यानामर्थिकदौर्बल्येन विवाहसमारम्भाः कठिना भवन्ति स्म। हुब्बल्ली नगरस्थानां कृते कृषिकप्रधानेन चेन्नमल्लप्पेन दत्तधनद्वारा कल्याणमण्टपमेकं स्थापयति स्म, येन दीना दलिता बहूपकृताः।

ग्रन्थालयः परमपावन एकभक्त्या
संस्थापितः स्वमठछात्रहिताय युक्त्या ।
यत्राद्य पुस्तकगणो विदुषां मनांसि
आकर्षयत्यनुदिनं विरलोऽविनाशी ॥ २८ ॥

ಗ್ರಂಥಾಲಯಃ ಪರಮ ಪಾವನ ಏಕಭಕ್ತ್ಯಾ ।
ಸಂಸ್ಥಾಪಿತಃ ಸ್ವಮಠ ಛಾತ್ರಹಿತಾಯ ಯುಕ್ತ್ಯಾ ।
ಯತ್ರಾದ್ಯ ಪುಸ್ತಕಗಣೋ ವಿದುಷಾಂ ಮನಾಂಸಿ
ಆಕರ್ಷಯತ್ಯನುದಿನಂ ವಿರಲೋಽ ವಿನಾಶೀ ॥ ೨೮ ॥

ग्रन्था अमूल्या मानवमित्राणि गुरवो वेति ज्ञायन्ते। विदुषा दोषरहितः ग्रन्थः निर्मीयते इति सर्वेऽपि जानन्ति। तेषां संग्रहः यदि ग्रन्थालये क्रियते छात्रहित संभवति। असंख्यो ग्रन्थगणोऽत्र सर्वेषामपि विदुषां मनांसि आकर्षयतीति सुविदितमेव।

दारिद्र्यपीडितसमाजहिताय नूनं
छात्रानुकूलवसतिर्विहिता सुमान्या।
येन प्रकाण्डविदुषां निवहः समोदः
धर्मप्रसार निरतोविरतः स धन्यः ॥ २९ ॥

ದಾರಿದ್ರ್ಯ ಪೀಡಿತ ಸಮಾಜಹಿತಾಯ ನೂನಂ
ಛಾತ್ರಾನುಕೂಲ ವಸತಿರ್ವಿಹಿತಾ ಸುಮಾನ್ಯಾ।
ಯೇನ ಪ್ರಕಾಂಡವಿದುಷಾಂ ನಿವಹ: ಸಮೋದ:
ಧರ್ಮಪ್ರಸಾರನಿರತೋ ವಿರತ: ಸಧನ್ಯ: ॥ ೨೯ ॥

दरिद्रजनपुत्राः विद्यार्जने दत्तचित्ता अपि अर्थाभावात् विद्यार्जना-समर्था इति मत्वा तेषामुपकारार्थमेकं छात्रानिलयं स्थापयाति स्म, येन प्रकाण्डपण्डिता सामोदं धर्मप्रचाररता भवन्ति।

जातिप्रभावरहिता वसतिः किलैका
छात्रानुकूलविहिता बृहदाकृतिः सा ।
यस्यां शताधिकदरिद्रकुमारसंघः
स्वाध्यायलीनमनसा वसति प्रमोदात् ॥ ३० ॥

ಜಾತಿ ಪ್ರಭಾವರಹಿತಾ ವಸತಿ ಕಿಲೈಕಾ
ಛಾತ್ರಾನುಕೂಲವಿಹಿತಾ ಬೃಹದಾಕೃತಿ: ಸಾ ।
ಯಸ್ಯಾಂ ಶತಾಧಿಕದರಿದ್ರ ಕುಮಾರ ಸಂಘ:
ಸ್ವಾಧ್ಯಾಯ ಲೀನಮನಸಾ ವಸತಿ ಪ್ರಮೋದಾತ್ ॥ ೩೦ ॥

एकोऽन्यः छात्रनिलयोऽनेन जगद्गुरुणा स्थापितः। यत्र जाति निरपेक्षं दरिद्रकुमारसंघाः स्वाध्यायमग्ना धन्यतां यान्ति । अनेन जगद्गुरोरस्य समाजसेवाभिलाषो व्यक्तीभवति ।

यः शिक्षितश्च पुरुषः पुरुषार्थमग्नः
आत्मोन्नतिं प्रति रतोऽपि विरक्तचित्तः।
नारी ममत्वसहिता यदि शिक्षिताऽस्ति
शिष्टां समष्टिमखिलां सकुलां करोति ॥ ३१ ॥

ಯಃ ಶಿಕ್ಷಿತಶ್ಚ ಪುರುಷಃ ಪುರುಷಾರ್ಥಮಗ್ನಃ
ಆತ್ಮೋನ್ನತಿಂಪ್ರತಿ ರತೋಽಪಿ ವಿರಕ್ತಚಿತ್ತಃ ।
ನಾರೀ ಮಮತ್ವಸಹಿತಾ ಯದಿ ಶಿಕ್ಷಿತಾಸ್ತಿ
ಶಿಷ್ಟಾಂ ಸಮಷ್ಟಿಮಖಿಲಾಂ ಸಕುಲಾಂ ಕರೋತಿ ॥ ೩೧ ॥

शिक्षितोऽपि पुरुषः पुरुषार्थमग्न आत्मोन्नतिं प्रति सदैव जागरूकः सन् समाजोपेक्षां करोति। किन्तु ममतारूपी नारी यदि शिक्षिता भवति स्वकुलसहितं समाजमखिलं शिष्टं करोतीति सुव्यक्तमेव।

देशोन्नतिर्हि प्रमदाविनयेन शक्या
तासां कृते भवतु शिक्षणसुप्रबन्धः ।
इत्थं विचिन्त्य कृतवान् महिलाहिताय
विद्यालयादिरचनां वसुधैकबन्धुः ॥ ३२ ॥

ದೇಶೋನ್ನತಿರ್ಹಿಪ್ರಮಂದಾ ವಿನಯೇನ ಶಕ್ಯಾ
ತಾಸಾಂ ಕೃತೇ ಭವತು ಶಿಕ್ಷಣ ಸುಪ್ರಬಂಧಃ ।
ಇತ್ಥಂ ವಿಚಿಂತ್ಯ ಕೃತವಾನ್ ಮಹಿಲಾಹಿತಾಯ
ವಿದ್ಯಾಲಯಾದಿರಚನಾಂ ವಸುಧೈಕಬಂಧುಃ ॥ ೩೨ ॥

समाजोन्नत्या सहैव देशोन्नतिः महिलानी शिक्षणेन सभवति। तासांकृते शिक्षणव्यवस्था स्वतन्त्रा भवतु इति निश्चित्य माहिला महाविद्यालयादिरचनां कृत्वा महिलानामुपरि महदुपकारं कृतवान् ।

छात्रानुकूलवसतिं नगरस्य मध्ये
विद्यालयादिसहितां प्रथमं सहस्र-।
बालानुशासनकृते सदयं समोदं
श्रीमन्निरञ्जन गुरुः कृतवान् मनस्वी ॥ ३३ ॥

ಛಾತ್ರಾನುಕೂಲವಸತಿಂ ನಗರಸ್ಯ ಮಧ್ಯೇ
ವಿದ್ಯಾಲಯಾದಿ ಸಹಿತಾಂ ಪ್ರಥಮಾಂ ಸಹಸ್ರ-।
ಬಾಲಾನುಶಾಸನಕೃತೇ ಸದಯಂ ಸಮೋದಮ್
ಶ್ರೀ ಮನ್ನಿರಜ್ಜನಗುರುಃ ಕೃತವಾನ್ ಮನಸ್ವೀ ॥ ೩೩ ॥

सहस्राधिकबालानांकृते छात्रालयसहितविद्यालयनिर्माणे (Residential School) दत्तमतिरय जगद्गुरुः सदयं तन्निर्मितिं कृतवानिति तस्य मनस्वितद्योतकं भवति ।

श्रीमूरुसाबिरमठस्य जगद्गुरुः सन्
संपद्भरोऽपि सततं विनयात्सुपूज्यः ।
औदार्यपूर्णहृदयश्च समाजसेवा-
मग्नो भवत्यनुदिनं कृतलिङ्गपूजः ॥ ३४ ॥

ಶ್ರೀ ಮೂರುಸಾವಿರ ಮಠಸ್ಯ ಜಗದ್ಗುರು ಸನ್
ಸಂಪದ್ಭರೋಽಪಿ ಸತತಂ ವಿನಯಾತ್ ಸುಪೂಜ್ಯಃ ।
ಔದಾರ್ಯಪೂರ್ಣ ಹೃದಯಶ್ಚ ಸಮಾಜಸೇವಾ
ಮಗ್ನೋ ಭವತ್ಯನುದಿನಂ ಕೃತಲಿಂಗ ಪೂಜಃ ॥ ೩೪ ॥

त्रिसहस्रशाखामठाधिपः संपद्भरोऽपि विनयसंपन्नोऽसौ जनानुरागी सदा पूज्यः। विद्यादिधनं विनयेनैव शोभते इति सुप्रसिद्धमेव। हृदयवैशाल्यतः समाजसेवामग्नः तामेव समाजसेवां लिङ्गपूजां मनोति। 'संन्तोषं जनयेत् प्राज्ञस्तदेवेश्वरपूजनम्' इति सुभाषितं जगद्गुरावस्मिन् सार्थकं भवति।

येनाप्रबुद्धमनसा सुरभारतीयं
नीतावमानपदवीं पदवीधरेणं।
आत्मोन्नति र्भवति कीदृगिति प्रबोध-
चन्द्रश्चकार पुरि संस्कृतपाठशालाम् || ३५ ||

ಯೇನಾಪ್ರಬುದ್ಧಮನಸಾ ಸುರಭಾರತೀಯಂ
ನೀತಾವಮಾನಪದವೀಂ ಪದವೀಧರೇಣ ।
ಆತ್ಮೋನ್ನತಿರ್ಭವತಿ ಕೀದೃಗಿತಿ ಪ್ರಬೋಧ
ಚಂದ್ರಶ್ಚಕಾರ ಪುರಿ ಸಂಸ್ಕೃತ ಪಾಠಶಾಲಾಮ್ ॥ ೩೫ ॥

कृत्वा यः संस्कृतोपेक्षां संस्कृतिं ज्ञातुमिच्छति ।
मूलाधारं विनासोऽयं भवनं कर्तुमिच्छति ।।

इति मयान्यत्र यदुक्तं तदनुसारं भारतीयसंस्कृति बोधाय आत्मज्ञानाय च संस्कृताध्ययनमनिवार्यम्। किन्तु अप्रबुद्धमनोभिः पदवीधरैरधुना संस्कृतोपेक्षा क्रियते येनात्मविनाशो भवति। अत एव मठप्राङ्गणमध्ये संस्कृतपाठशालास्थापनं कृत्वा छात्रोपकारं कृतवान्।

काव्यादिलब्धयशसः कति वित्तहीनाः
सम्भाविता गुरुवरेण धनप्रदानात् ।
देशे विदेशनिवहे निजयोग्यता तै-
राविष्कृता भवति पण्डितमन्यमानैः ॥ ३६ ॥

ಕಾವ್ಯಾದಿಲಬ್ಧಯಶಸಃ ಕತಿ ವಿತ್ತಹೀನಾಃ
ಸಂಭಾವಿತಾ ಗುರುವರೇಣ ಧನಪ್ರಧಾನಾತ್ ।
ದೇಶೇ ವಿದೇಶ ನಿವಹೇ ನಿಜಯೋಗ್ಯತಾ ತೈ
ರಾವಿಷ್ಕೃತಾ ಭವತಿ ಪಂಡಿತಮನ್ಯಮಾನೈಃ ॥ ೩೬ ॥

काव्यकला पूर्णा अपि दारिद्र्यपीडिता विद्वांसोऽवकाशाभावात् स्वीयां योग्यतां प्रकटीकर्तुमपि न शक्नुवन्ति । अतस्तान् कति पयान् प्रति भाशालिनः धनादिभिः संभावयित्वा कलोत्तेजनं ददातीति सुविदितमेव । तेषु कविषु विद्वत्सुच कतिदेश-विदेशलब्धपुरस्कारा निजयोग्यता परिचयंसाधु कारयन्ति ।

यन्मन्दिरं परिणतं समये व्यतीते
जीर्णं विकारि तदयं सदयं विलोक्य।
सर्वं नवीकरणतो रुचिरं चकार
तुष्टिंच भक्तनिवहः सततं प्रयाति ॥ ३७ ॥

ಯನ್ಮಂದಿರಂ ಪರಿಣತಂ ಸಮಯೇ ವ್ಯತೀತೇ
ಜೀರ್ಣಂ ವಿಕಾರಿ ತದಯಂ ಸದಯಂ ವಿಲೋಕ್ಯ ।
ಸರ್ವಂ ನವೀಕರಣತೋ ರುಚಿರಂ ಚಕಾರ
ತುಷ್ಟಿಂ ಚ ಭಕ್ತನಿವಹಃ ಸತತಂ ಪ್ರಯಾತಿ ॥ ೩೭ ॥

कालक्रमेण मठभवनं जीर्णमभवत्। तदवस्थं भवनं विलोक्य सदयं नवीकृतमलंकृतंच चकार, येन सर्वेऽपि भक्ताः तुष्टिं यान्ति।

येऽप्यत्र यान्ति सुजनाः भवतापतप्ताः
तेषां कृते ऽतिथिगृहद्वितयं विधाय ।
दूरीकरोति दुरितं शिवभक्तियोगात्
कैलासमेव सकलं भुवनेऽवतीर्णम् || ३८ ||

ಯೇ ಽ ಪ್ಯತ್ರಯಾಂತಿ ಸುಜನಾಃ ಭವತಾಪತಪ್ತಾಃ
ತೇಷಾಂ ಕೃತೇಽ ತಿಥಿಗೃಹದ್ವಿತಯಂ ವಿಧಾಯ ।
ದೂರೀಕರೋತಿ ದುರಿತಂ ಶಿವಭಕ್ತಿಯೋಗಾತ್
ಕೈಲಾಸಮೇವ ಸಕಲಂ ಭುವನೇ ಽ ವತೀರ್ಣಮ್ ॥ ೩೮ ॥

भवतापतप्ता येऽपि भक्ता अत्रायान्ति तेषां कृतेऽतिथिगृहनिर्माणं कृतमनेन । भुवनेऽवतीर्णं कैलासमित्रे मठ भवनमिदं दृष्ट्वा शान्ता भवन्ति, भक्तिप्रभावात् दुरितं दूरीकुर्वन्ति ।

शम्भुप्रसादजनिताः सुजनाः सदैव
शर्वानुभावभरिताः भुवने भवन्तु ।
इत्थं विचिन्त्य सदयः शिवभक्तिहेतोः
शर्वानुभावभवनं भुवने चकार ॥ ३९ ॥

ಶಂಭು ಪ್ರಸಾದಜನಿತಾಃ ಸುಜನಾಃ ಸದೈವ
ಶರ್ವಾನುಭಾವಭರಿತಾಃ ಭುವನೇ ಭವಂತು ।
ಇತ್ಥಂ ವಿಚಿಂತ್ಯ ಸದಯಃ ಶಿವಭಕ್ತಿಹೇತೋಃ
ಶರ್ವಾನುಭಾವಭವನಂ ಭುವನೇ ಚಕಾರ ॥ ೩೯ ॥

'जन्माद्यस्य यतः' इति ब्रह्मसूत्रानुसारेण सर्वेऽपि शम्भुप्रसाद-जाताः । 'ते पुनः शिवानुभावपूर्णा भवन्तु,' इति विचिन्त्य शिवानुभवनमेकं शिवभक्तिप्रसार हेतोः निर्मितवान् ।

'धर्मप्रचारणमिदं भुवनेऽ निवार्यं
येन प्रजाः पशुपतेः कृपया प्रशान्ताः ।
लोकोपकार निरताः सततं भवन्तु'
धर्मप्रचारसमितिं स्वमठे चकार ॥ ४० ॥

'ಧರ್ಮಪ್ರಚಾರಣಮಿದಂ ಭುವನೇ ಽ ನಿವಾರ್ಯಂ
ಯೇನ ಪ್ರಜಾಃ ಪಶುಪತೇಃ ಕೃಪಯಾ ಪ್ರಶಾಂತಾಃ ।
ಲೋಕೋಪಕಾರ ನಿರತಾಃ ಸತತಂ ಭವಂತು
ಧರ್ಮ ಪ್ರಚಾರಸಮಿತಿಂ ಸ್ವಮಠೇ ಚಕಾರ ॥ ೪೦ ॥

नीतिप्रधान धर्मप्रचारादेव विश्वशान्तिः इति न्यायमनुसृत्य, सर्वेऽपि शिवकृपया शान्ता भवन्तु, लोकोपकारनिरता भवन्तु इति स्वमठे जगद्गुरुगङ्गाधर धर्मप्रचारक मण्डलमेकं स्थापितवान् । 'धर्मो रक्षति रक्षित' इत्यपि स्मर्तव्यम् ।

या संस्कृतिर्भुवि नुता जनतापहारी
तस्याः प्रचारविषये ननु चिन्तितोऽसौ ।
तेन प्रबुद्धविदुषां सुधियां समाजः
ग्रन्थादिलेखनविधौ विनिवेशयतेऽसौ ॥ ४१ ॥

ಯಾ ಸಂಸ್ಕೃತಿರ್ಭುವಿ ನುತಾ ಜನತಾಪಹಾರೀ
ತಸ್ಯಾ: ಪ್ರಚಾರವಿಷಯೇ ನನು ಚಿಂತಿತೋಽಸೌ ।
ತೇನ ಪ್ರಬುದ್ಧವಿದುಷಾಂ ಸುಧಿಯಾಂ ಸಮಾಜ:
ಗ್ರಂಥಾದಿಲೇಖನವಿಧೌ ವಿನಿವೇಶ್ಯತೇಽಸೌ ॥ ೪೧ ॥

'आ नो भद्राः क्रतवो यन्तु विश्वतः' इति वेदभारत्यनुसारं भारतीयसंस्कृतेर्विशालसद्भावना विश्वबन्धुत्वं चसुष्टुव्यक्ती भवतः। एतादृशानुपमसंस्कृतेः प्रचारोऽवश्य इति मत्वा तदर्थं विदुषां सुधियां समाजं ग्रन्थादिलेखने जगद्गुरुरसौ विनिवेशयति, तद्द्वारा संस्कृतिप्रचारधुरीणो भवति। अद्यावधि संस्कृति-सम्बद्धग्रन्थशत चतुष्टयप्रकाशनं तेन कृतमिति यदा विचार्यते, तदास्य महिमातिशयो दरीदृश्यते ।

राष्ट्रीय जागृतिकृते कृतचिन्तनोऽयं
गीताद्यमूल्यविषयान् प्रतिपादयंश्च ।
जाड्यादिदोषनिवहं प्रतिहन्तुकामः
देशप्रवासरसिको भुवनाभिरामः ॥ ४२ ॥

ರಾಷ್ಟ್ರೀಯ ಜಾಗೃತಿಕೃತೇ ಕೃತಚಿಂತನೋಽಯಂ
ಗೀತಾದ್ಯಮೂಲ್ಯ ವಿಷಯಾನ್ ಪ್ರತಿಪಾದಯಂಶ್ಚ ।
ಜಾಡ್ಯಾದಿದೋಷ ನಿವಹಂ ಪ್ರತಿಹಂತುಕಾಮಃ
ದೇಶಪ್ರವಾಸರಸಿಕೋ ಭುವನಾಭಿರಾಮಃ ॥ ೪೨ ॥

गीताद्यमूल्यविषयप्रतिपादनद्वारा राष्ट्रीय (राष्ट्रैक्य) भावना जागरणं कर्तुं कृतनिश्चयः जनताजाड्यदिदोषदूरीकरणे कृतमतिरसौ देशप्रवासे कृताभिरुचिरासीत् । देशपर्यटनं कृत्वा जनजागृतिं संपाद्य स्वीयं जङ्गमाभिधानं सार्थकं चकारेति शक्यते वक्तुम् ।

उद्योगहीनमनुजान् भुवि भारभूतान्
शिक्षावतोऽपि पदवीगणभूषितान् तान् ।
संवीक्ष्य तन्त्रनिपुणान् कुरुतेऽनुकंम्पात्
औन्नत्यमेति च यतो भुवने स्वराष्ट्रम् ॥ ४३ ॥

ಉದ್ಯೋಗಹೀನಮನುಜಾನ್ ಭುವಿ ಭಾರಭೂತಾನ್
ಶಿಕ್ಷಾವತೋಽಪಿ ಪದವೀಗಣ ಭೂಷಿತಾನ್ ತಾನ್ ।
ಸಂವೀಕ್ಷ್ಯ ತಂತ್ರನಿಪುಣಾನ್ ಕುರುತೇಽನುಕಂಪಾತ್
ಔನ್ನತ್ಯಮೇತಿ ಚ ಯತೋ ಭುವನೇ ಸ್ವರಾಷ್ಟ್ರಮ್ ॥ ೪೩ ॥

कलाविज्ञानादिपदवीगणभूषितोऽपि शिक्षितः समाज उद्योगावसरानुपस्थितौ इतो भ्रष्टस्ततो भ्रष्टो भूत्वा भुवि भारभूतो वर्तते। एतां दयनीयामवस्था विचार्य युवकान् तन्त्रज्ञान् कर्तुं तान्त्रिक (Technical) महाविद्यालयादिस्थापने दृढचित्तोऽसौ तत्कार्ये साफल्यं प्राप्य राष्ट्रोन्नतिकार्ये कृतकृत्यो भवति।

वित्तादिलोकविषये परतन्त्रभावाद्
दास्यं प्रयान्ति ललनाः पुरुषोपभोग्याः ।
तासां हिताय कुरुते प्रथमं प्रबन्धं
तन्त्रप्रशिक्षणकृते बिमलस्वभावः ॥ ४४ ॥

ವಿತ್ತಾದಿಲೋಕವಿಷಯೇ ಪರತಂತ್ರಭಾವಾದ್
ದಾಸ್ಯಂ ಪ್ರಯಾಂತಿ ಲಲನಾಃ ಪುರುಷೋಪಭೋಗ್ಯಾಃ ।
ತಾಸಾಂ ಹಿತಾಯ ಕುರುತೇ ಪ್ರಥಮಂ ಪ್ರಬಂಧಂ
ತಂತ್ರಪ್ರಶಿಕ್ಷಣ ಕೃತೇ ವಿಮಲ ಸ್ವಭಾವಃ ॥ ೪೪ ॥

आर्थिकस्वातन्त्रहीनत्वात्स्त्रियः पारतन्त्र्यशृङ्खलाबद्धा भवन्ति, येन 'न स्त्री स्वातन्त्र्यमर्हतीति स्मृतिवाक्यं सार्थकं भवति। अत एव ताः पुरुषोपभोग्या भवन्ति'। तासामार्थिक स्वातन्त्र्य (स्वावलम्बन) सम्पदनाय जीविका संपादन समर्थं तान्त्रिकशिक्षणव्यवस्थां च कृतवान्। यद्यपि वीरशैवमते स्त्री स्वातन्त्र्यप्रतिपादनं कृतं तथापि तदनुष्ठानविधौ प्रथमः प्रयत्नोऽनेन कृत इति वक्तुं शक्यते।

"बाल्ये सुसंस्कृतमना मनुजः प्रशान्तः
लोकोपकारकरणे दृढदीक्षितः स्यात्" ।
इत्थं विचिन्त्य शिशुशिक्षणकेन्द्र एकः
प्रारभ्यते विमलचारुतरप्रदेशे ॥ ४५ ॥

"ಬಾಲ್ಯೇ ಸುಸಂಸ್ಕೃತಮನಾ ಮನುಜಃ ಪ್ರಶಾಂತಃ
ಲೋಕೋಪಕಾರಕರಣೇ ದೃಢದೀಕ್ಷಿತಃ ಸ್ಯಾತ್" ।
ಇತ್ಥಂ ವಿಚಿಂತ್ಯ ಶಿಶುಶಿಕ್ಷಣ ಕೇಂದ್ರ ಏಕಃ
ಪ್ರಾರಭ್ಯತೇ ವಿಮಲಚಾರುತರ ಪ್ರದೇಶೇ ॥ ೪೫ ॥

बाल्यात् प्रभृत्येव यदि शिशवे नैतिकशिक्षणं दीयते कालेगतेऽपि बहुतिथौ लोकोपकारमतिः स्यात्। अत एव गर्भस्थशिशुसंस्काराः क्रियन्ते। यस्मिन् परिसरे शिशुः संवर्ध्यते, तादृशीमेव संस्कृतिं लभत इत्यत्र संन्देहलेशोऽपि नास्ति। सर्वमेतद् विचार्य जगद्गुरुणा पावने चारुतरे प्रदेशे शिशुशिक्षाकेन्द्रस्थापनं कृतम्।

तेषां कृते परमकारुणिकेन तेन
शाला पुरातनसुसंस्कृतिशिक्षणार्थम् ।
वासप्रसादसहिता शिशुसौख्यहेतु-
रालोच्यते विबुधमण्डलमण्डनेन ॥ ४६ ॥

ತೇಷಾಂ ಕೃತೇ ಪರಮಕಾರುಣಿಕೇನ ತೇನ
ಶಾಲಾ ಪುರಾತನ ಸುಸಂಸ್ಕೃತಿ ಶಿಕ್ಷಣಾರ್ಥಮ್ ।
ವಾಸಪ್ರಸಾದಸಹಿತಾ ಶಿಶುಸೌಖ್ಯಹೇತು-
ರಾಲೋಚ್ಯತೇ ವಿಬುಧಮಂಡಲ ಮಂಡನೇನ ॥ ೪೬ ॥

परमकारुण्यवतानेन तेषां शिशूनां कृते भारतीयसंस्कृति शिक्षणार्थं वासप्रसादनिलयसहितशालानिर्माणमालोच्यते, येन तेषां सर्वाङ्गीणोन्नतिः साध्या भवति। अस्याः शालायाः (Residential School) निर्माणं प्राचीन गुरुकुल सरणी-मनुसृत्य भविष्यति।

नानाविधाद्भुतवचःसमुदायपूर्णे
देशोऽस्मदीयजननीसदृशे सुबन्धुः।
हिन्दी यतो भवति भारतराष्ट्रभाषा
हिन्दी प्रशिक्षणकृते कृतवान् प्रबन्धम् || ४७ ||

ನಾನಾವಿಧಾದ್‌ಭುತವಚಃ ಸಮುದಾಯ ಪೂರ್ಣೇ
ದೇಶೋಽಸ್ಮದೀಯಜನನೀ ಸದೃಶೇ ಸುಬಂಧುಃ।
ಹಿಂದೀ ಯತೋ ಭವತಿ ಭಾರತರಾಷ್ಟ್ರಭಾಷಾ
ಹಿಂದೀ ಪ್ರಶಿಕ್ಷಣ ಕೃತೇ ಕೃತವಾನ್ ಪ್ರಬಂಧಮ್ ॥ ೪೭ ॥

वर्णतो वेषतो भाषयाहारतो भेदपूर्णोऽयं देशः। यद्यपि विविधतायामेकतादर्शनं भवति, तथापि राष्ट्रभाषैका भवतु, सा च हिन्दी भाषैवस्यात्। अत अस्माकं सर्वेषां हिन्दीभाषाध्ययनमनिवार्यमिति विचार्य हिन्दी प्रशिक्षण (Hindi B.Ed.) केन्द्र स्थापनं कृतवान्।

वाराणसीपुरपतेः निजसन्निधाने
हिन्दीप्रभुत्वमभवद् भवतः प्रभूतम् ।
हिन्दीप्रबन्धरचनानिपुणो विशुद्धः
हिन्दीप्रचाररचिको भुवने प्रसिद्धः ॥ ४८ ॥

ವಾರಾಣಸೀ ಪುರಪತೇಃ ನಿಜ ಸನ್ನಿಧಾನೇ
ಹಿಂದೀ ಪ್ರಭುತ್ವಮಂಭವದ್ ಭವತಃ ಪ್ರಭೂತಮ್ ।
ಹಿಂದೀ ಪ್ರಬಂಧ ರಚನಾ ನಿಪುಣೋ ವಿಶುದ್ಧಃ
ಹಿಂದೀ ಪ್ರಚಾರ ರಸಿಕೋ ಭುವನೇ ಪ್ರಸಿದ್ಧಃ ॥ ೪೮ ॥

काशीगमनपूर्णप्रयोजनं प्राप्तुं संस्कृतेन सार्धमेव हिन्दी भाषा प्रावीण्यमपि लब्धम्। हिन्दी माध्यमेन नैकग्रन्थ रचना निपुणोऽसौ हिन्दी प्रचार प्रसारार्थं कृतमतिः भवतीति स्वयंवेद्यम् ।

स्वातन्त्र्यलक्षणमिदं ननु राष्ट्रभाषा
राष्ट्रैक्यभावमुखरा सरला सुबोधा ।
भूमण्डल प्रथित भारतदेशकीर्ति-
हेतुः सदैव जनताहृदि पूजनीया ॥ ४९ ॥

ಸ್ವಾತಂತ್ರ್ಯ ಲಕ್ಷಣಮಿದಂ ನನು ರಾಷ್ಟ್ರ ಭಾಷಾ
ರಾಷ್ಟ್ರೈಕ್ಯಭಾವಮುಖರಾ ಸರಲಾ ಸುಬೋಧಾ ।
ಭೂಮಂಡಲ ಪ್ರಥಿತ ಭಾರತ ದೇಶ ಕೀರ್ತಿ–
ಹೇತುः ಸದೈವ ಜನತಾ ಹೃದಿ ಪೂಜನೀಯಾ ॥ ೪೯ ॥

आङ्ग्लभाषा विदेशीया सती पारतन्त्र्यप्रतीकमिति वक्तुं शक्यते । अतः स्वीया राष्ट्रभाषा राष्ट्रभावैक्यस्य राष्ट्र-स्वातन्त्र्यस्य च लक्षणं भवति । एषा राष्ट्रभाषा सरला सुबोधा जनताहृदि पूजनीया भवति । सर्वेषामस्माकं कर्तव्यं यत् हिन्दी भाषाध्ययनं भवतु ।

वैविध्यपूर्णजगतः प्रतिबिम्बकेऽस्मिन्
राष्ट्रे सदा मुकुरवद् विमलस्वभावे ।
नानाविधानि बहुधा वचनानि सन्ति
येषां सुमान्यजननी सुरवाक् प्रबुद्धा ॥ ५० ॥

ವೈವಿಧ್ಯ ಪೂರ್ಣ ಜಗತಃ ಪ್ರತಿಬಿಂಬಕೇಽಸ್ಮಿನ್
ರಾಷ್ಟ್ರೇ ಸದಾ ಮುಕುರವದ್ ವಿಮಲಸ್ವಭಾವೇ ।
ನಾನಾ ವಿಧಾನಿ ಬಹುಧಾ ವಚನಾನಿ ಸಂತಿ
ಯೇಷಾಂ ಸುಮಾನ್ಯಜನನೀ ಸುರವಾಕ್ ಪ್ರಬುದ್ಧಾ ॥ ೫೦ ॥

भाषादिवैविध्यपूर्णेऽस्माकं राष्ट्रे नानाविधा भाषाः सन्ति। तासां सर्वासामपि जननीव सुरभारती दृढमुपकारिणीति सर्वेषामेवाभिप्रायः। संस्कृतज्ञानं विना मातृभाषाज्ञानं संपूर्णं न भवति। उक्तं च मयान्यत्र–

कृत्वा यः संस्कृतोपेक्षां संस्कृतिं ज्ञातुमिच्छति।
मूलाधारं विना सोऽयं भवनं कर्तुमिच्छति ।।

प्रान्तीयवाक्परिचयार्थमितः सुमान्य-
गीर्वाणवाक् परिचयो नितरामवश्यः ।
मातामही च वचसामवन्यते चेद्
देशीयवागवनतिः सुलभानिवार्या ॥ ५१ ॥

ಪ್ರಾಂತೀಯವಾಕ್ ಪರಿಚಯಾರ್ಥಮಿತಃ ಸುಮಾನ್ಯ-
ಗೀರ್ವಾಣವಾಕ್ ಪರಿಚಯೋ ನಿತರಾಮವಶ್ಯಃ ।
ಮಾತಾಮಹೀ ಚ ವಚಸಾಮವಮನ್ಯತೇ ಚೇದ್
ದೇಶೀಯವಾಗವನತಿಃ ಸುಲಭಾನಿವಾರ್ಯಾ ॥ ೫೧ ॥

देशभाषापूर्णपरिचयार्थं सुरभारतीज्ञानमवश्यमिति सर्वेषां भाषाविदामभिप्रायः। भाषाणां जननीव मातामहीव वर्तमाना देववाणी यद्यवमन्यते, देशभाषावनतिरनिवार्या भवतीति वक्तुं शक्यते ।

इत्थं विचिन्त्य सततं परिपूर्णचित्तः
गीर्वाणवाक्प्रसरणाय कृतश्रमोऽयम् ।
विद्यालयादिरचनाकुशलोऽ प्रमत्तः
प्राचीनसंस्कृतिसुरक्षणदत्तचित्तः ॥ ५२ ॥

ಇತ್ಥಂ ವಿಚಿಂತ್ಯ ಸತತಂ ಪರಿಪೂರ್ಣಚಿತ್ತಃ
ಗೀರ್ವಾಣವಾಕ್ ಪ್ರಸರಣಾಯ ಕೃತಶ್ರಮೋಽಯಮ್ ।
ವಿದ್ಯಾಲಯಾದಿ ರಚನಾ ಕುಶಲೋಽಪ್ರಮತ್ತಃ
ಪ್ರಾಚೀನ ಸಂಸ್ಕೃತಿ ಸುರಕ್ಷಣದತ್ತಚಿತ್ತಃ ॥ ೫೨ ॥

भारतीयभाषाज्ञानं संस्कृतिबोधश्च संस्कृताध्ययेनैव शक्यते इति सुष्टु विचार्य सुरभारतीप्रचाराय प्रसाराय च कृतश्रमोऽयम् । संस्कृतपाठशालामहाविद्यालयादिरचनामग्नः प्राचीनसंस्कृतिरक्षणेऽपि दत्तचित्तो वर्तते ।

साहित्यगीतविमुखः सुमुखोऽप्यधंन्यः
तीर्यग्गणादपि भवेन्मनुजो जघन्यः।
संगीतशास्त्रकुशलान् मनुजान् विधातुं
बिद्यालयादिनिपुणो जनसौख्यहेतुः ॥ ५३ ॥

ಸಾಹಿತ್ಯಗೀತವಿಮುಖಃ ಸುಮುಖೋಽಪ್ಯಧನ್ಯಃ
ತೀರ್ಯಗ್ಗಣಾದಪಿ ಭವೇನ್ಮನುಜೋ ಜಘನ್ಯಃ ।
ಸಂಗೀತಶಾಸ್ತ್ರ ಕುಶಲಾನ್ ಮನುಜಾನ್ ವಿಧಾತುಂ
ವಿದ್ಯಾಲಯಾದಿ ನಿಪುಣೋ ಜನಸೌಖ್ಯಹೇತುಃ ॥ ೫೩ ॥

साहित्यसंगीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीनः।

इति सुभाषितमनुसृत्य कलाविहीनो मनुजः पशुसमान इति विदुषामभिमतम्। अतः संगीतशास्त्रकुशलान् कर्तुं संगीतविद्यालयादिरचनादत्तमतिरस्ति।

संगीततुष्टमनसा पशवोऽपि वृक्षाः
रोमाञ्चिता ननु भवन्ति च यान्ति शान्तिम् ।
सन्तोषदो हि शिवपूजनपुण्यपात्रं
सङ्गीतशास्त्ररसिका भुवि सन्तु सन्तः ॥ ५४ ॥

ಸಂಗೀತತುಷ್ಟ ಮನಸಾ ಪಶವೋಽಪಿ ವೃಕ್ಷಾಃ
ರೋಮಾಂಚಿತಾ ನನು ಭವಂತಿ ಚ ಯಾಂತಿ ಶಾಂತಿಮ್ ।
ಸಂತೋಷದೋಹಿ ಶಿವಪೂಜನ ಪುಣ್ಯಪಾತ್ರಂ
ಸಂಗೀತ ಶಾಸ್ತ್ರರಸಿಕಾ ಭುವಿ ಸಂತು ಸಂತಃ ॥ ೫೪ ॥

शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गानरसं तरुः ।

इति सुभाषितानुसारं न केवलं मानवाः, तरवोऽपि पशवोऽपि संगीतज्ञाः संगीतश्रवणसौख्या वा सन्ति। संगीतशास्त्रद्वारा यः सन्तोषं ददाति स शिवपूजानिरत इति वक्तुं शक्यते। उक्तं चान्यत्र-

सन्तोषं जनयेत्प्राज्ञस्तदेवेश्वर पूजनम् ।
अतः सन्तः संगीतशास्त्रज्ञा भवन्तु ।

साहित्यसृष्टिरसिको विरसेऽपि लोके
आल्हादयत्यनुदिनं भवतापयुक्तम् ।
सन्मार्गदर्शनमहो कुरुते स्वतन्त्रः
कं वोपकारमथवा न कविः करोति ॥ ५५ ॥

ಸಾಹಿತ್ಯ ಸೃಷ್ಟಿ ರಸಿಕೋ ವಿರಸೇಽಪಿ ಲೋಕೇ
ಆಹ್ಲಾಯತ್ಯನುದಿನಂ ಭವತಾಪಯುಕ್ತಮ್ ।
ಸನ್ಮಾರ್ಗದರ್ಶನಮಹೋ ಕುರುತೇ ಸ್ವತಂತ್ರ:
ಕಂ ವೋಪಕಾರಮಥವಾ ನ ಕವಿ: ಕರೋತಿ ॥ ೫೫ ॥

साहित्यनिर्माणरसिकः कविः भवतापतप्तं मानवमानन्दयतीति लोकविदितम् । काव्यप्रयोजनमौलिभूतं सद्यः परनिर्वृतिरिति मम्मटादिभिः सुष्टु भणितम् । ब्रह्मानन्दसहोदरेण काव्यानन्देन सहैव सन्मार्गदर्शनं कान्तासम्मिततयोपदेशमपि करोति कविरिति तज्ज्ञानामभिप्रायः ।

नैव स्वयं प्रकुरुते कविताकृतार्थः
साहित्यसृष्टिमतुलां हृतलोकचित्ताम् ।
पाण्डित्यकाव्यमहतां कुरुते सुमानं
लोकोपकाररसिको गुणरक्तचित्तः ॥ ५६ ॥

ನೈವ ಸ್ವಾಯಂ ಪ್ರಕುರುತೇ ಕವಿತಾ ಕೃತಾರ್ಥ:
ಸಾಹಿತ್ಯ ಸೃಷ್ಟಿ ಮತುಲಾಂ ಪೃತಲೋಕ ಚಿತ್ತಾಮ್ ।
ಪಾಂಡಿತ್ಯಕಾವ್ಯ ಮಹತಾಂ ಕುರುತೇ ಸುಮಾನಂ
ಲೋಕೋಪಕಾರರಸಿಕೋ ಗುಣರಕ್ತಚಿತ್ತ: ॥ ೫೬ ॥

कविहृदयः पाण्डित्यपूर्णः स्वयमेवातुलां साहित्यसृष्टिं कुर्वन् काव्यपाण्डित्यलब्धकीर्तीन् विदुषः सम्मानयतीति नैव विचित्रम् । गुणग्राहकबुद्धिः लोकोपकाररसिकः जगद्गुरुरिति येन ज्ञायते ।

साहित्यराशिमतुलां च विलोक्य लोकः
आश्चर्यमेति नितरां सुविचारपूर्णाम् ।
या निर्मिता रसिकवृन्दहितैकहेतुः
योगीन्द्रनिर्मलयशोरमणीयकेतुः ॥ ५७ ॥

ಸಾಹಿತ್ಯರಾಶಿಮತುಲಾಂ ಚ ವಿಲೋಕ್ಯ ಲೋಕಃ
ಆಶ್ಚರ್ಯಮೇತಿ ನಿತರಾಂ ಸುವಿಚಾರ ಪೂರ್ಣಾಮ್ ।
ಯಾ ನಿರ್ಮಿತಾ ರಸಿಕವೃಂದ ಹಿತೈಕ ಹೇತುಃ
ಯೋಗೀಂದ್ರ ನಿರ್ಮಲಯಶೋ ರಮಣೀಯ ಕೇತುಃ ॥ ೫೭ ॥

स्वयं विदुषानेन जगद्गुरुणा 'मूजगं' नाम्ना साहित्य निर्मितिरतुला क्रियते । एतद् विलोक्य'श्चर्यं चकितो लोक इति वक्तुं शक्यते । सहृदयहृदयानन्दहेतुरियं काव्यादिनिर्मितिरस्य गुरोःकीर्ति केतुरिव प्रतिभाति ।

वेदान्तशास्त्रविमला: कृतय: कृतार्थैः
नानाविधाश्च रचिता विदुषां समूहैः ।
काव्य प्रकाशरुचिराः कृतयः कवीनां
वृन्दैः पुनर्विरचिता रससूक्तिपूर्णाः ॥ ५८ ॥

ವೇದಾಂತಶಾಸ್ತ್ರ ವಿಮಲಾ: ಕೃತಯ: ಕೃತಾರ್ಥೈ:
ನಾನಾವಿಧಾಶ್ಚ ರಚಿತಾ: ವಿದುಷಾಂ ಸಮೂಹೈ: ।
ಕಾವ್ಯ ಪ್ರಕಾಶ ರುಚಿರಾ: ಕೃತಯ: ಕವೀನಾಂ
ವೃಂದೈ: ಪುನರ್ವಿರಚಿತಾ: ರಸಸೂಕ್ತಿ ಪೂರ್ಣಾ: ॥ ೫೮ ॥

परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसत्सु विरलेषु तेषु सत्सु अग्रगण्योऽयं कवीनां विदुषांच तद्ग्रन्थशत प्रकाशनद्वारा प्रोत्साहन करोतीति सुविदितमेव ।

अर्थं विनाद्य भुवने किमपि स्थिरं ने-
त्यालोच्य लोकहितकामनया विरक्तः ।
शालादिनिर्वहणरक्तमनःप्रवृत्तिः
अर्थव्ययेन रघुभूपतिमन्वगच्छत् ॥ ५९ ॥

ಅರ್ಥಂ ವಿನಾದ್ಯ ಭುವನೇ ಕಿಮಪಿ ಸ್ಥಿರಂ ನೇ-
ತ್ಯಾಲೋಚ್ಯ ಲೋಕಹಿತಕಾಮನಯಾ ವಿರಕ್ತಃ ।
ಶಾಲಾದಿನಿರ್ವಹಣ ರಕ್ತಮನಃ ಪ್ರವೃತ್ತಿಃ
ಅರ್ಥವ್ಯಯೇನ ರಘುಭೂಪತಿ ಮನ್ವಗಚ್ಛತ್ ॥ ೫೯ ॥

यदपि सत्कर्म कर्तुमर्थवश्यकता भवति । विर्थेनान किमपि कर्तुमसाध्यमिति लोकानुभूतिः । अतः समाजहितकामनया विद्यालयादिस्थापनार्थमर्थसंग्रहण सद्व्ययंच कृत्वा रघु महाराजानुकरणं कृतवानिति सर्वेषामभिप्रायः ।

शुद्धक्रियासु निरतः परतत्त्ववेत्ता
लोकोपकारकृतशंकरपूजनोऽसौ ।
प्रारब्धपूरणमतिः हृतलोकचित्तः
कैलासदर्शनमहो कुरुते क्रियायाम् ॥ ६० ॥

ಶುದ್ಧ ಕ್ರಿಯಾಸು ನಿರತಃ ಪರತತ್ತ್ವವೇತ್ತಾ
ಲೋಕೋಪಕಾರ ಕೃತ ಶಂಕರ ಪೂಜನೋಽಸೌ ।
ಪ್ರಾರಬ್ಧ ಪೂರಣಮತಿಃ ಹೃತಲೋಕ ಚಿತ್ತಃ
ಕೈಲಾಸದರ್ಶನಮಹೋ ಕುರುತೇ ಕ್ರಿಯಾಯಾಮ್ ॥ ೬೦ ॥

सत्यशुद्धा क्रियाशक्तिः 'कायक' इति नाम्ना वीरशैवदर्शने प्रसिद्धा । समाजसेवामेव लिङ्गपूजां मन्यमान एसौ क्रियायामेव कैलासदर्शनं करोति । बसवादिशिवशरणैः कायके । शुद्धक्रियायां एव कैलास इति भणितं तथैवाचरितंच ।

अव्यक्तरूपमतुलं भगवन्तमेकं
नानास्वरूपविलसद्विमलप्रकाशम् ।
यं चिन्तयन्ति हृदये कृतिनो निराशाः
तस्यैव पूजनविधौ कलहप्रियत्वम् ॥ ६१ ॥

ಅವ್ಯಕ್ತ ರೂಪಮತುಲಂ ಭಗವಂತಮೇಕಂ
ನಾನಾ ಸ್ವರೂಪವಿಲಸದ್ ವಿಮಲ ಪ್ರಕಾಶಮ್ ।
ಯಂ ಚಿಂತಯಂತಿ ಹೃದಯೇ ಕೃತಿನೋ ನಿರಾಶಾ:
ತಸ್ಯೈವ ಪೂಜನವಿಧೌ ಕಲಹ ಪ್ರಿಯತ್ವಮ್ ॥ ೬೧ ॥

पूजासौकर्याय अव्यक्तस्यापि परमात्मनः मूर्तीकरणमनुमतं दार्शनिकैः भारतदेशे ।

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।

सर्वदेवनमस्कारः केशवं प्रति गच्छति । इति सुभाषितानुसारं नानारूपपूजितोऽपि देव एक एव । ऋग्वेद एव एकदेवोपसना प्रतिपादनमित्थं कृतम्–

एकं सद् विप्राः बहुधा वदन्ति ।

किन्त्वेतामूदारभावनां विस्मृत्य मतीयकलहे सर्वे जनाः प्रवृत्ता इति सर्वेषामनुभवः ।

रामेति कृष्ण हर शंकर इत्यनेके
अल्लेति पूजनपराः कतिचिन्मतीयाः ।
मौढ्यं तथापि भुवने मतविप्रलाप-
द्वारा निजं प्रकटयत्यतुलं हि लोकः ॥ ६२ ॥

ರಾಮೇತಿ ಕೃಷ್ಣ ಹರ ಶಂಕರ ಇತ್ಯನೇಕೇ
ಅಲ್ಲೇತಿ ಪೂಜನಪರಾಃ ಕತಿಚಿನ್ಮತೀಯಾಃ ।
ಮೌಢ್ಯಂ ತಥಾಪಿ ಭುವನೇ ಮತವಿಪ್ರಲಾಪ-
ದ್ವಾರಾ ನಿಜಂ ಪ್ರಕಟಯತ್ಯತುಲಂ ಹಿ ಲೋಕಃ ॥ ೬೨ ॥

एकतायां वैविध्यं मतीयविभिन्नतामत्र निरूपयति । यमेव भगवन्तं रामेति शंकरेति समाह्वयन्ति, तमेवाल्लेति पूजयन्ति तथापि मतीयकलहद्वारा लोकः निजमौढ्यदर्शनं कारयति ।

यद् वा पुरं गुरुवरः कुरुते कृतार्थं
वासेन तुष्टमनसा शिवभक्तियुक्तः ।
तस्मिन् विशालनगरे कतिचिन्मतान्धाः
कुर्वन्त्यशान्तिमतुलां परितो मदान्धाः ॥ ६३ ॥

ಯದ್ವಾ ಪುರಂ ಗುರುವರ: ಕುರುತೇ ಕೃತಾರ್ಥಂ
ವಾಸೇನ ತುಷ್ಟಮನಸಾ ಶಿವಭಕ್ತಿ ಯುಕ್ತ: ।
ತಸ್ಮಿನ್ ವಿಶಾಲನಗರೇ ಕತಿಚಿನ್ಮತಾಂಧಾ:
ಕುರ್ವಂತ್ಯ ಶಾಂತಿಮತುಲಾಂ ಪರಿತೋ ಮದಾಂಧಾ: ॥ ೬೩ ॥

सन्तुष्टमानसोऽसौ यस्मिन् नगरे वासं करोति तस्मिन् हुब्बल्लो नगरे कतिचिन्मतान्धामदान्धाः परितः

अशान्ति कुर्वन्तीति विषादविषयः ।

इस्लामहिन्दुजनतामतवैमनस्यं
वैरं परस्परमहो कुरुते कुरूपम् ।
व्यस्तं च येन भवति प्रतिजीविचित्तं
नश्येत् पुनः प्रतिदिनं वणिजादिवित्तम् ॥ ६४ ॥

ಇಸ್ಲಾಮು ಹಿಂದು ಜನತಾ ಮತವೈಮನಸ್ಯಂ
ವೈರಂ ಪರಸ್ಪರಮಹೋ ಕುರುತೇ ಕುರೂಪಮ್ ।
ವ್ಯಸ್ತಂ ಚ ಯೇನ ಭವತಿ ಪ್ರತಿಜೀವಿಚಿತ್ತಂ
ನಶ್ಯೇತ್ ಪುನಃ ಪ್ರತಿ ದಿನಂ ವಣಿಜಾದಿ ವಿತ್ತಮ್ ॥ ೬೪ ॥

इस्लामहिन्दुजननामतीय कलहेन या हानिरुत्पद्यते, तस्या कुरूपस्वरूपमत्र वर्ण्यते। प्रतिजीविचित्तं सदैव भयग्रस्तं व्यस्तं च। प्रतिक्षणं धनादिनाशः संभावति येन न कोऽपि सुखेन शयनमपि कर्तुं शक्नोति।

एतद् विचार्य प्रमुखा जनतानियोगाद्
वात्सल्यपूर्ण हृदयं सदयं विनम्राः ।
वित्तादिनाशजनितं जनचित्तदैन्यं
दूरीकरोतु भगवन्निति यान्ति धन्यम् ॥ ६५ ॥

ಏತದ್ ವಿಚಾರ್ಯ ಪ್ರಮುಃಖಾ ಜನತಾ ನಿಯೋಗಾದ್
ವಾತ್ಸಲ್ಯಪೂರ್ಣ ಹೃದಯಂ ಸದಯಂ ವಿನಮ್ರಾಃ ।
ವಿತ್ತಾದಿನಾಶಜನಿತಂ ಜನಚಿತ್ತ ದೈನ್ಯಂ
ದೂರೀಕರೋತು ಭಗವನ್ನಿತಿ ಯಾಂತಿ ಧನ್ಯಮ್ ॥ ೬೫ ॥

मतीयकलहाद्या वित्तादिह्रानिरुपजायते, तां विचार्य तन्निवारणार्थं सदयं वात्सल्यपूर्णहृदयंच जगद्गुरुमेत्य 'जनचित्तदैन्यमेतद् दूरीकरोतु भवान् इति विनम्राः समाज प्रमुखा यान्ति, प्रार्थयन्ति स्म ।

सारस्वतेन तपसा कृतकाशिवासः
विद्योदयेन विलसन्मुखमण्डलः सन् ।
हुब्बल्लिवासिसुकृतैरिह पीठराजे
रराजते च रचनाकुशलः सुशीलः ॥ ६६ ॥

ಸಾರಸ್ವತೇನ ತಪಸಾ ಕೃತಕಾಶಿವಾಸಃ
ವಿದ್ಯೋದಯೇನ ವಿಲಸನ್ಮುಖ ಮಂಡಲಃ ಸನ್ ।
ಹುಬ್ಬಳ್ಳಿವಾಸಿ ಸುಕೃತೈರಿಹ ಪೀಠರಾಜೇ
ರಾರಾಜತೇಚ ರಚನಾಕುಶಲಃ ಸುಶೀಲಃ ॥ ೬೬ ॥

काशीवासं कृत्वा सारस्वतेन तपसा विद्योदयं प्राप्य पण्डित प्रकाण्डो भूत्वा प्रतिनिवृत्तः हुब्बल्लीनगरवासिनां सुकृतैरेव जगद्गुरुपदे विलसत्ययं सुशीलः कृतिरचनाकुशलः ।

धर्मेण मानवगणो ध्रियते प्रशान्तः
इत्याहुरद्य सदयाः सुधियः समस्ताः ।
धर्मः स एव यदि मानववैरहेतुः
को वा भवेत्क्षितितले ननु शान्तिहेतुः ॥ ६७ ॥

ಧರ್ಮೇಣ ಮಾನವಗಣೋ ಧ್ರಿಯತೇ ಪ್ರಶಾಂತಃ
ಇತ್ಯಾಹುರದ್ಯ ಸದಯಾಃ ಸುಧಿಯಃ ಸಮಸ್ತಾಃ ।
ಧರ್ಮಃ ಸ ಏವ ಯದಿ ಮಾನವವೈರಿಹೇತುಃ
ಕೋವಾ ಭವೇತ್ ಕ್ಷಿತಿತಲೇ ನನು ಶಾಂತಿ ಹೇತುಃ ॥ ೬೭ ॥

'धारणाद् धर्मः' इति सूक्तिमनुसृत्य धर्मः रक्षितः मानवं रक्षतीति सर्वेऽपि जानन्ति । किन्तु स एव धर्मः यदि वैरकारणं भवति, भूतलेऽस्मिन् शान्तिहेतुः को भवितुमर्हति ?

यं धर्मसारमतुलं बसवो * ब्रवीति
तस्योपदेशहृतमानव चित्ततापः ।
संभ्रान्तिभीतिविकलेनगराधिपेऽस्मिन्
संस्थापिता श्रमवता गुरुणा हि शान्तिः ॥ ६८ ॥

ಯಂ ಧರ್ಮಸಾರಮತುಲಂ ಬಸವೋ ಬ್ರವೀತಿ
ತಸ್ಯೋಪದೇಶ ಹೃತ ಮಾನವ ಚಿತ್ತತಾಪಃ ।
ಸಂಭ್ರಾಂತಿಭೀತಿ ವಿಕಲೇ ನಗರಾಧಿಪೇಽ ಸ್ಮಿನ್
ಸಂಸ್ಥಾಪಿತಾಶ್ರಮವತಾ ಗುರುಣಾಹಿ ಶಾಂತಿಃ ॥ ೬೮ ॥

बसवादि शिवशरणैरादिष्टनीतिमार्गानुसारेण विश्वशान्तिः संभवतीति विदुषामभिमतम्। किन्तु मतीयकलहान्नगरेऽस्मिन् भ्रान्तिभीति पीडिते सति शान्तिस्थापनं महताश्रमेणाध्यात्मिक शक्तिद्वाराच जगद्गुरुरयं कृतवान् ।

---

* बसववचनमिदं–

चौर्यं न कार्यमथवा न वधोऽपि कार्यः
मिथ्या न वाच्यमथवा कुपितोन भूयात् ।
निन्द्यः परोन निचकीर्तन मप्यकार्यं
श्री संगमेश ! तव तुष्टिरनेन भूयात् ।।

बैरं निसर्गसहजं मुनिसन्निधाने
त्यक्त्वा सुखी भवति लोक इति श्रुतं यत् ।
अस्याद्भुतेन यमिनां च पुरःसरस्य
कार्येण दृष्टिपथमेति महाजनस्य ॥ ६९ ॥

ವೈರಂ ನಿಸರ್ಗಸಹಜಂ ಮುನಿಸನ್ನಿಧಾನೇ
ತ್ಯಕ್ತ್ವಾ ಸುಖೀ ಭವತಿ ಲೋಕ ಇತಿ ಶ್ರುತಂ ಯತ್ ।
ಅಸ್ಯಾದ್ಭುತೇನ ಯಮಿನಾಂ ಚ ಪುರಃಸರಸ್ಯ
ಕಾರ್ಯೇಣ ದೃಷ್ಟಿಪಥಮೇತಿ ಮಹಾಜನಸ್ಯ ॥ ೬೯ ॥

मुनिसन्निधौ निसर्गसुलभंमपि प्राणिवैरं दूरी भवतीति पौराणिक कथाभिर्ज्ञायते । कुमारसंभवे पार्वती तयोवर्णनावसरे कालिदासेन प्रोक्तं–

'विरोधिसत्त्वोज्झित पूर्वमत्सरम्' इत्यादि ।

यमिनामग्रगण्यस्यानेनाद्भूतेन कार्येणेदं प्रमणीक्रियतेऽधुना ।

अग्निप्रदीप्तभवनानि विलुण्ठितांश्च
पण्यापणांश्च नगरेऽत्र परेतभूमौ।
दृष्ट्वा भयं मनसि दासजनस्य मृत्यो-
राक्रन्दनं च सततं परिपीडितानाम् ॥ ७० ॥

ಅಗ್ನಿಪ್ರದೀಪ್ತಭವನಾನಿ ವಿಲುಂಠಿತಾಂಶ್ಚ
ಪಣ್ಯಾಪಣಾಂಶ್ಚ ನಗರೇಽತ್ರ ಪರೇತ ಭೂಮೌ ।
ದೃಷ್ಟ್ವಾ ಭಯಂ ಮನಸಿ ದಾಸಜನಸ್ಯ ಮೃತ್ಯೋ-
ರಾಕ್ರಂದನಂ ಚ ಸತತಂ ಪರಿಪೀಡಿತಾನಾಮ್ ॥ ೭೦ ॥

मातोयकलहात् भयपीडित नगरेऽस्मिन् या पौशाचिकी घटना वर्तते, तां दृष्ट्वा यमकिंकराणामपि मनसि भयं जागर्ति। परिपीडितानामाक्रन्दनं च श्रुत्वा एहृदयानां हृदयं सदयं भवति।

कारुण्यपूर्णमनसा मृदुमानसानां
पीडां विलोक्य सरुजो गिरिशप्रसादात् ।
द्वेषं परस्परमिदं जनतापहेतुं
दूरीचकार सफलो गुरुसार्वभौमः । ॥ ७१ ॥

ಕಾರುಣ್ಯಪೂರ್ಣಮನಸಾ ಮೃದುಮಾನಸಾನಾಂ
ಪೀಡಾಂ ವಿಲೋಕ್ಯ ಸರುಜೋ ಗಿರಿಶಪ್ರಸಾದಾತ್ ।
ದ್ವೇಷಂ ಪರಸ್ಪರಮಿದಂ ಜನತಾಪಹೇತುಂ
ದೂರೀಚಕಾರ ಸಫಲೋ ಗುರುಸಾರ್ವಭೌಮಃ ॥ ೭೧ ॥

अनया दुर्घटनया मृदुमानसानां सज्जनानां या पीडोत्पन्ना, तां वीक्ष्य गुरुवर्यस्यास्य मनः पीडितं करुणापूर्णं चाभवत् । शिवानुग्रहादयं जनतापकारणमिदं परस्पर द्वेषं दूरीकर्तुं समर्थोऽभवत् ।

जात्यन्धधूर्तमनसां हि विवेकरूप-
चन्द्रोदयो भवति निर्मलसुस्वरूपः ।
येन प्रकाशभरितं नगरं पुनस्तत्
हर्षप्रदं नयनयोर्हि कृपाकटाक्षात् ॥ ७२ ॥

ಜಾತ್ಯಂಧಧೂರ್ತ ಮನಸಾಂ ಹಿ ವಿವೇಕರೂಪ-
ಚಂದ್ರೋದಯೋ ಭವತಿ ನಿರ್ಮಲ ಸುಸ್ವರೂಪಃ ।
ಯೇನ ಪ್ರಕಾಶಭರಿತಂ ನಗರಂ ಪುನಸ್ತತ್
ಹರ್ಷಪ್ರದಂ ನಯನಯೋರ್ಹಿ ಕೃಪಾ ಕಟಾಕ್ಷಾತ್ ॥ ೭೨ ॥

अस्य गुरोः कृपाकटाक्षात् धूर्तानां जात्यन्धानामपि विवेक चन्द्रो-
दयो भवति। येन पुनरपि नगरमिदं हर्षभरं प्रकाशपूर्णं च
नयनयोरानन्दप्रदं भवति ।

सर्वेऽपि देवतनुजा मनुजाः सुबन्धु-
भावप्रभावसहिताः सहिताः समाजे ।
भूलोकनाकनवनिर्मितिकार्यशक्ताः
संभ्रान्तिभीतिरहिताः मतगर्वमुक्ताः || ७३ ||

ಸರ್ವೇऽಪಿ ದೇವತನುಜಾ ಮನುಜಾ ಸುಬಂಧು-
ಭಾವ ಪ್ರಭಾವ ಸಹಿತಾ: ಸಹಿತಾ: ಸಮಾಜೇ ।
ಭೂಲೋಕನಾಕನವನಿರ್ಮಿತಿಕಾರ್ಯಶಕ್ತಾ:
ಸಂಭ್ರಾಂತಿ ಭೀತಿ ರಹಿತಾ: ಮತಗರ್ವ ಮುಕ್ತಾ: ॥ ೭೩ ॥

'विविधतायामेकता' भारतदेशविशेषः । धार्मिक सामरस्येन बन्धुभावेन च यदि सर्वेऽपि भारतीयाः सहिताः भयभीति मुक्ताश्चेत् भूलोकनाकनिर्मिति समर्था भवेयुरिति वक्तुं शक्यते । उक्तं मयान्यत्र-

मूलतो भारतीया वयं सुप्रजाः ।
एकता भिन्नतायामियं भारते ।।

सर्वोदयं मनसि चिन्तयतोऽस्य चिन्ता-
लीनस्य शंकरकृपापरिरक्षितस्य ।
भावैक्यसाधनपथे प्रगतिः प्रमाद-
दूरीकृतौ भवति कारणमक्षतस्य ॥ ७४ ॥

ಸರ್ವೋದಯಂ ಮನಸಿ ಚಿಂತಯತೋಽಸ್ಯ ಚಿಂತಾ-
ಲೀನಸ್ಯ ಶಂಕರ ಕೃಪಾ ಪರಿರಕ್ಷಿತಸ್ಯ ।
ಭಾವೈಕ್ಯಸಾಧನ ಪಥೇ ಪ್ರಗತಿಃ ಪ್ರಮಾದ-
ದೂರೀಕೃತಾ ಭವತಿ ಕಾರಣಮಕ್ಷತಸ್ಯ ॥ ೭೪ ॥

सर्वोदयं प्रति सदा चिन्तनशीलोऽसौ शिवानुग्रहरक्षितः सन् तत्सिद्धये कृतप्रयत्नो वर्तते । अस्य जगद्गुरोरयमाशयः- भावैक्य साधनामार्गे प्रगतिस्तदैव साध्या यदा प्रमादालस्यादिदूरीकरण भवति ।

स्वर्णाक्षरैश्च घटना परमाद्भुतेयं
शक्या विलेखितुमहो इतिहासपृष्ठे ।
यस्येदृशं बलमुदारविशालबुद्धे-
र्नासाध्यमस्ति किमपि प्रथितस्य लोके ॥ ७५ ॥

ಸ್ವರ್ಣಾಕ್ಷರೈಶ್ಚ ಘಟನಾ ಪರಮಾದ್ಭುತೇಯಂ
ಶಕ್ಯಾ ವಿಲೇಖಿತುಮಹೋ ಇತಿಹಾಸಪೃಷ್ಠೇ ।
ಯಸ್ಯೇದೃಶಂ ಬಲಮುದಾರ ವಿಶಾಲಬುದ್ಧೇ–
ರ್ನಾಸಾಧ್ಯಮಸ್ತಿ ಕಿಮಪಿ ಪ್ರಥಿತಸ್ಯ ಲೋಕೇ ॥ ೭೫ ॥

मतीयकलहदूरीकरणं नगरे पुनः शान्तिस्थापनंच परमाद्भुत घटनेति सर्वैरपि प्रशंसापात्रम् । नैतिकबलं विना तदशक्यमिति वक्तुं शक्यते। अर्थात् विशालोदारबुद्धेः नैतिकबलयुतस्य मानवस्योसाध्यं किमपि लोकत्रयेऽपि नास्ति ।

साहित्यनिर्मितिकृतां विदुषां समाजं
सन्तोषयत्यनुदिनं सवितेव पद्मम् ।
संभावयत्यसमपुस्तकलेखकांश्च
साहित्यनिर्मितिरुदारशरण्यतुष्टा ॥ ७६ ॥

ಸಾಹಿತ್ಯ ನಿರ್ಮಿತಿಕೃತಾಂ ವಿದುಷಾಂ ಸಮಾಜಂ
ಸಂತೋಷಯತ್ಯನುದಿನಂ ಸವಿತೇವ ಪದ್ಮಮ್ ।
ಸಂಭಾವಯತ್ಯಸಮಪುಸ್ತಕಲೇಖಕಾಂಶ್ಚ
ಸಾಹಿತ್ಯ ನಿರ್ಮಿತಿರುದಾರ ಶರಣ್ಯತುಷ್ಟಾ ॥ ೭೬ ॥

येऽपि विद्वांसः साहित्यनिर्माणदक्षास्तान् सर्वानुत्तेजयति संन्तोषयति च। ग्रन्थपुरस्कारविधिनासमानग्रन्थरचनासमर्थान् विदुषः संभावयति प्रतिवर्षम्। पुरा किल साहित्यादि कला पोषणं राजाश्रये भवति स्म। किन्त्वद्य मठाधीशानामोदृना मुदाराश्रये साहित्यनिर्माणं शक्यं भवतीति भणितुं शक्यते ।

श्रीवीरशैवसुमतं शिथिलं विलोक्य
चिन्ताकुलो भवति लोकहितैकमग्नः ।
तत्तत्त्वविद्वटुगणं विनयप्रकाश-
पूर्णं करोति च मठेषु नियुक्तपूर्वम् ॥ ७७ ॥

ಶ್ರೀ ವೀರಶೈವ ಸುಮತಂ ಶಿಥಿಲಂ ವಿಲೋಕ್ಯ
ಚಿಂತಾಕುಲೋ ಭವತಿ ಲೋಕ ಹಿತೈಕಮಗ್ನ: ।
ತತ್ತತ್ತ್ವವಿದ್ ವಟುಗಣಂ ವಿನಯ ಪ್ರಕಾಶ-
ಪೂರ್ಣಂ ಕರೋತಿ ಚ ಮಠೇಷು ನಿಯುಕ್ತ ಪೂರ್ವಮ್ ॥ ೭೭ ॥

मानवकल्याणकरं भव्यं च वीरशैवमतं कालक्रमेण शिथिलं जातं, येनासौ गुरुश्चिन्ताकुलो भवति। अत एव मठेषु नियुक्तवटुगणं वीरशैवतत्त्वज्ञानप्रकाशपूर्णं कर्तुं प्रयत्नशीलोऽयं साधकसंघ निर्माणं करोति स्म ।

धर्मप्रजागरणहैतुकपादयात्रां
सार्धं सहस्रशरणैरकरोत्पवित्राम् ।
अज्ञाननाशकृतलोकहितो महात्मा
श्रीसिद्धलिङ्गयतिसंस्मरणं च कुर्वन् ॥ ७८ ॥

ಧರ್ಮ ಪ್ರಜಾಗರಣಹೈತುಕ ಪಾದಯಾತ್ರಾಂ
ಸಾರ್ಧಂ ಸಹಸ್ರಶರಣೈರಕರೋತ್ ಪವಿತ್ರಾಮ್ ।
ಅಜ್ಞಾನ ನಾಶಕೃತಲೋಕಹಿತೋ ಮಹಾತ್ಮಾ
ಶ್ರೀ ಸಿದ್ಧಲಿಂಗ ಯತಿ ಸಂಸ್ಮರಣಂ ಚ ಕುರ್ವನ್ ॥ ೭೮ ॥

वीरशैवमतोपदिष्टनीतिमार्गोपेक्षां कुर्वतो जनस्याज्ञाननिवारणाय च सहस्रशरणैः सह पवित्रां पादयात्रामयं कृतवान् येन चतुः शतमानपूर्वं श्रीसिद्धलिङ्गयतिकृतपादयात्रास्मरणमस्माकं भवति।

लिङ्गाङ्गिनामपि दुराचरणं विलोक्य
मूढप्रवृत्तिसहितं व्यथितो यतीन्द्रः ।
सन्मार्गदर्शनपरोऽ भवदात्मतुष्टः
येन प्रमादरहितः सकलः समाजः || ७९ ||

ಲಿಂಗಾಂಗಿನಾಮಪಿ ದುರಾಚರಣಂ ವಿಲೋಕ್ಯ
ಮೂಢ ಪ್ರವೃತ್ತಿ ಸಹಿತಂ ವ್ಯಥಿತೋ ಯತೀಂದ್ರಃ ।
ಸನ್ಮಾರ್ಗ ದರ್ಶನ ಪರೋಽಭವದಾತ್ಮತುಷ್ಟಃ
ಯೇನ ಪ್ರಮಾದರಹಿತಃ ಸಕಲಃ ಸಮಾಜಃ ॥ ೭೯ ॥

यद्यपि वीरशैवमतं जीवनरीतिर्नंज.तिस्तथापि कालेव्यतीते जातिवाचकं जातमिति व्यावहारिकं सत्यम्। सत्येवं वीरशैव कुलोत्पन्ना दुराचारनिरता इति यतीन्द्रोऽयं दृढं व्यथितः। अतः पादयात्रादि द्वारा जनजाग्रतिं कुर्वन् सन्मार्गदर्शनं कारयति।

धर्मप्रजागरणहैतुकपादयात्रां
सार्धं सहस्रशरणैरकरोत्पवित्राम् ।
अज्ञाननाशकृतलोकहितो महात्मा
श्रीसिद्धलिङ्गयतिसंस्मरणं च कुर्वन् ॥ ७८ ॥

ಧರ್ಮ ಪ್ರಜಾಗರಣಹೈತುಕ ಪಾದಯಾತ್ರಾಂ
ಸಾರ್ಧಂ ಸಹಸ್ರಶರಣೈರಕರೋತ್ ಪವಿತ್ರಾಮ್ ।
ಅಜ್ಞಾನ ನಾಶಕೃತಲೋಕಹಿತೋ ಮಹಾತ್ಮಾ
ಶ್ರೀ ಸಿದ್ಧಲಿಂಗ ಯತಿ ಸಂಸ್ಮರಣಂ ಚ ಕುರ್ವನ್ ॥ ೭೮ ॥

वीरशैवमतोपदिष्टनीतिमार्गोपेक्षां कुर्वतो जनस्याज्ञाननिवारणाय च सहस्रशरणैः सह पवित्रां पादयात्रामयं कृतवान् येन चतुःशतमानपूर्वं श्रीसिद्धलिङ्गयतिकृतपादयात्रास्मरणमस्माकं भवति।

लिङ्गाङ्गिनामपि दुराचरणं विलोक्य
मूढप्रवृत्तिसहितं व्यथितो यतीन्द्रः।
सन्मार्गदर्शनपरोऽ भवदात्मतुष्टः
येन प्रमादरहितः सकलः समाजः ॥ ७९ ॥

ಲಿಂಗಾಂಗಿನಾಮಪಿ ದುರಾಚರಣಂ ವಿಲೋಕ್ಯ
ಮೂಢ ಪ್ರವೃತ್ತಿ ಸಹಿತಂ ವ್ಯಥಿತೋ ಯತೀಂದ್ರಃ ।
ಸನ್ಮಾರ್ಗ ದರ್ಶನ ಪರೋಽಭವದಾತ್ಮತುಷ್ಟಃ
ಯೇನ ಪ್ರಮಾದರಹಿತಃ ಸಕಲಃ ಸಮಾಜಃ ॥ ೭೯ ॥

यद्यपि वीरशैवमतं जीवनरीतिर्नजातिस्तथापि कालेऽव्यतीते जातिवाचकं जातमिति व्यावहारिकं सत्यम्। सत्येवं वीरशैव कुलोत्पन्ना दुराचारनिरता इति यतीन्द्रोऽयं दृढं व्यथितः। अतः पादयात्रादि द्वारा जनजाग्रतिं कुर्वन् सन्मार्गदर्शनं कारयति।

पंचाशताब्दवयसा समलंकृताङ्गं
गङ्गाधराख्यशिवयोगिधुरीणमेनम् ।
भक्ताः प्रमोदसहिताः स्वहितानुकूलं
सम्भावयन्ति विविधस्तुतिगीतमालम् ॥ ८० ॥

ಪಂಚಾಶತಾಬ್ದ ವಯಸಾ ಸಮಲಂಕೃತಾಂಗಂ
ಗಂಗಾಧರಾಖ್ಯ ಶಿವಯೋಗಿ ಧುರೀಣಮೇನಮ್ ।
ಭಕ್ತಾ: ಪ್ರಮೋದ ಸಹಿತಾ: ಸ್ವಹಿತಾನುಕೂಲಂ
ಸಂಭಾವಯಂತಿ ವಿವಿಧ ಸ್ತುತಿ ಗೀತಮಾಲಮ್ ॥ ೮೦ ॥

यदायं पंचाशद्वर्षामितेन वयसा समलंकृतस्तदा भक्ताः अभिमानिनश्च यथामति यथाहितं च सम्भावयन्ति विविधस्तुतिगीतैस्तोषयन्ति स्म । येनास्य जनानुरागः प्रकटीभवति ।

पूजादिके पुरजनो द्रविणैकरक्तो
मन्दादरो भवति लौकिकभोगसक्तः ।
ईशप्रसादजननी च शिवार्चनेति
पूजासुसंघटननिर्मितिमातनोति ॥ ८१ ॥

ಪೂಜಾದಿಕೇಪುರಜನೋ ದ್ರವಿಣೈಕರಕ್ತೋ
ಮಂದಾದರೋ ಭವತಿ ಲೌಕಿಕಭೋಗಸಕ್ತ: ।
ಈಶಪ್ರಸಾದಜನನೀ ಚ ಶಿವಾರ್ಚನೇತಿ
ಪೂಜಾಸುಸಂಘಟನ ನಿರ್ಮಿತಿಮಾತನೋತಿ ॥ ೮೧ ॥

घनार्जनमग्नोऽयं जनः विशेषतो नगरवासी शिवपूजादिधार्मिक विधिविधाने मन्दादरो भवति । किन्तु शिवपूजैव प्रसादजननीति यदि स्मर्यते, तदा शिवार्चनावश्यकता व्यक्तीभवति । अत एव शिवपूजासंघटनतत्परोऽयं भवति ।

आचार्यं एकनयनं च विरक्त एकं
श्रीवीरशैवजनताख्यशरीरिणोऽन्यम् ।
ऐक्यं तयोर्जगति मानववृद्धिहेतोः
कर्तुं सदा प्रयतते यमिनां वरेण्यः ॥ ८२ ॥

ಆಚಾರ್ಯ ಏಕನಯನಂ ಚ ವಿರಕ್ತ ಏಕಂ
ಶ್ರೀ ವೀರಶೈವಜನತಾಖ್ಯ ಶರೀರಿಣೋಽನ್ಯಮ್ ।
ಐಕ್ಯಂ ತಯೋರ್ಜಗತಿ ಮಾನವ ವೃದ್ಧಿ ಹೇತೋಃ
ಕರ್ತುಂ ಸದಾ ಪ್ರಯತತೇ ಯಮಿನಾಂ ವರೇಣ್ಯಃ ॥ ೮೨ ॥

वीरशैव मतस्थापनाचार्यं विषये मतभेदो वर्तते। शिव एव वीरशैवधर्मस्थापक इति मत्वा विवादमेनं दूरी कर्तुं शक्यते। वीरशैवमतप्रसारप्रचारयोः प्रतिनिधी आचार्य वर्गः (संस्कृत साहित्यनिर्माता) शरण संघः (कन्नड साहित्य निर्माता) भवतः। आचार्यं एकनयनं विरक्तोऽन्यद्नयनमिति कृत्वा तयोरेकता निर्माणे कृतमतिः कृतयत्नोऽयं जगद्गुरुः सफलो वर्तते।

स्वार्थैकरक्त मनसा कति भक्तनाम-
भाजो भजन्ति विरसं पुनरेतयोस्ते ।
तेषां वचः सुमधुरं परिणामदुःखं
श्रुत्वा समाजघटने विमुखी भवन्ति ॥ ८३ ॥

ಸ್ವಾರ್ಥೈಕರಕ್ತಮನಸಾ ಕತಿ ಭಕ್ತನಾಮ
ಭಾಜೋ ಭಜಂತಿ ವಿರಸಂ ಪುನರೇತಯೋಸ್ತೇ ।
ತೇಷಾಂ ವಚ : ಸುಮಧುರಂ ಪರಿಣಾಮದುಃಖಂ:
ಶ್ರುತ್ವಾ ಸಮಾಜ ಘಟನೇ ವಿಮುಖೀಭವಂತಿ ॥ ೮೩ ॥

आचार्यशरणमार्गानुयायिनो भक्ताभिधानभाजो कतिपयाः स्वार्थे सक्ताः धूर्ता तयोविरसं दीर्घीकुर्वन्ति, येन समाजसघटनमतीव कठिनं भवति। यतस्तेषां वचनमादौ सुधासमं परिणामदुःखमिति नीति विदामभिमतम्। तदेतद् वचनं श्रुत्वा समाजघटने विमुखा भवन्ति।

ग्रन्थत्रयं शतगुणं सुविचारपूर्णं
विद्वत्सुलेखितमहो त्वरितं प्रकाश्य ।
ज्ञानप्रकाशरसिको विरतः स्वसौख्ये
श्री शारदार्चनसुखी भुवने कृतार्थः || ८४ ||

ಗ್ರಂಥತ್ರಯಂ ಶತಗುಣಂ ಸುವಿಚಾರಪೂರ್ಣಂ
ವಿದ್ವತ್ ಸುಲೇಖಿತಮಹೋ ತ್ವರಿತಂ ಪ್ರಕಾಶ್ಯ ।
ಜ್ಞಾನ ಪ್ರಕಾಶರಸಿಕೋ ವಿರತ : ಸ್ವಸೌಖ್ಯೇ
ಶ್ರೀ ಶಾರದಾರ್ಚನಸುಖೀ ಭುವನೇ ಕೃತಾರ್ಥ: ॥ ೮೪ ॥

अज्ञाननिवारणाय ज्ञानप्रचाराय च ग्रन्थप्रकाशनमतिमुख्यं भवति। एतद् विचार्य गुरुरसौ विद्वद्भिः त्रिशताधिक ग्रन्थान् लेखयित्वा स्वयं च लिखित्वा प्रकाशितवान्। एवं शारदा सपर्यानिरतो भवति।

कालक्रमेण सुरवाक् समुपेक्षितेति
खिन्नश्च संस्कृतकृती: विदुषां गणस्य ।
नैका: प्रकाशयति ताश्च पुरष्करोति
प्राचीनसंस्कृतिसमाश्रयतुष्टचित्त: ॥ ८५ ॥

ಕಾಲಕ್ರಮೇಣ ಸುರವಾಕ್ ಸಮುಪೇಕ್ಷಿತೇತಿ
ಖಿನ್ನಶ್ಚ ಸಂಸ್ಕೃತ ಕೃತೀ: ವಿದುಷಾಂಗಣಸ್ಯ ।
ನೈಕಾ : ಪ್ರಕಾಶಯತಿ ತಾಶ್ಚ ಪುರಸ್ಕರೋತಿ
ಪ್ರಾಚೀನ ಸಂಸ್ಕೃತಿಸಮಾಶ್ರಯತುಷ್ಟಚಿತ್ತ : ॥ ೮೫ ॥

भारतीय संस्कृतिमाध्यमं संस्कृतमिति सर्वेषां विदुषामभिप्राय: । किन्तु कालक्रमेण संस्कृतोपेक्षा क्रियते । एतद् विलोक्य खिन्नो भूत्वा विद्वद्भिरनेकसंस्कृतरचना विलेख्य प्रकाशयति, ग्रन्थकर्तॄन पुरष्करोतिच । एव संस्कृतिरक्षणे कृतमति: वर्तते ।

यः पण्डितः कविवरः स्वयमेव सार्थ–
ग्रन्थप्रकाशनपरः कृतिलेखकश्च ।
योगीश्वरोऽपि जनसौख्यकृते कृतार्थः
ग्रन्थान् समाजशिवपूजनभाग् विरच्य ॥ ८६ ॥

ಯಃ ಪಂಡಿತಃ ಕವಿವರಃ ಸ್ವಯಮೇವ ಸಾರ್ಥ-
ಗ್ರಂಥ ಪ್ರಕಾಶನ ಪರ : ಕೃತಿಲೇಖಕಶ್ಚ ।
ಯೋಗೀಶ್ವರೋಽಪಿ ಜನಸೌಖ್ಯಕೃತೇ ಕೃತಾರ್ಥಃ
ಗ್ರಂಥಾನ್ ಸಮಾಜ ಶಿವಪೂಜನಭಾಗ್ ವಿರಚ್ಯ ॥ ೮೬ ॥

अयं जगद्गुरुः स्वय पण्डितः कविवरो भूत्वोत्कृष्टग्रन्थरचना समर्थो भवति। कृतिलेखकोऽयं योगीश्वरः ग्रन्थ प्रकाशनपरः समाज परशिवपूजानिरतो भवतीति शक्यते वक्तुम् ।

पूर्णज्ञसूक्तिनिवहस्त्रिसहस्रसंख्यः
सर्वज्ञसूक्तिरचनास्मरणं करोति ।
आमुष्मिकैहिकसुखं प्रति दत्तचित्तं
सन्मार्गदर्शनपरो रमयत्यमूल्यः || ८७ ||

ಪೂರ್ಣಜ್ಞ ಸೂಕ್ತಿನಿವಹಸ್ತ್ರಿಸಹಸ್ರಸಂಖ್ಯ:
ಸರ್ವಜ್ಞಸೂಕ್ತಿರಚನಾಸ್ಮರಣಂ ಕರೋತಿ ।
ಆಮುಷ್ಮಿಕೈಹಿಕಸುಖಂ ಪ್ರತಿ ದತ್ತಚಿತ್ತಂ
ಸನ್ಮಾರ್ಗದರ್ಶನಪರೋ ರಮಯತ್ಯಮೂಲ್ಯ: || ೮೭ ||

त्रिसहस्राधिकसंख्यः पूर्णज्ञवचनरचनां कृत्वा जगति प्रसिद्धो भवति। ग्रन्थममूल्यमेनं विलोक्य सर्वज्ञवचनस्मरणं सर्वेऽपि विद्वांसः ऐहिकामुष्मिकसुखं प्रति दत्तचित्तं जनं सन्मार्गदर्शन परोऽयं रमयतीति भणितुं शक्यते ।

आरुह्य शैलशिखरं श्रममेति कायः
साहित्यमेरुशिखरस्य गुरुः प्रसन्नः ।
आरोहणं च कुरुते न कदापिखिन्नः
काव्यादिबन्धगतिरीदृगहोऽद्वितीया ॥ ८८ ॥

ಆರುಹ್ಯ ಶೈಲಶಿಖರಂ ಶ್ರಮಮೇತಿ ಕಾಯಃ
ಸಾಹಿತ್ಯ ಮೇರು ಶಿಖರಸ್ಯ ಗುರು ಪ್ರಸನ್ನಃ ।
ಆರೋಹಣಂ ಚಕುರುತೇ ನಕದಾಪಿ ಖಿನ್ನಃ
ಕಾವ್ಯಾದಿ ಬಂಧಗತಿರೀದೃಗಹೋಽ ದ್ವಿತೀಯಾ ॥ ೮೮ ॥

शैलशिखरारोहणं कृत्वा देहः परिश्रान्तो भवतीति सर्वेषामनुभवः। किन्तु साहित्यमेरुशिखरारोहणं कृत्वापि नायं खिन्नो भवतीति महदाश्चर्यकरम्। अनेन सिद्ध्यति यत् काव्यादिबन्धगतिरन्यादृशी वर्तते।

अस्याद्भुतप्रगतिमत्सरपूर्णचित्ताः
केऽपि प्रमादभरिताः समदाः समाजे ।
हालाहलं च चषकेऽर्पयतः कुचित्तान्
आनन्दयत्यनुदिनं करुणामृतेन ॥ ८९ ॥

ಅಸ್ಯಾದ್ಭುತ ಪ್ರಗತಿ ಮತ್ಸರ ಪೂರ್ಣ ಚಿತ್ತಾ:
ಕೇಽಪಿ ಪ್ರಮಾದಭರಿತಾ: ಸಮದಾ: ಸಮಾಜೇ ।
ಹಾಲಾಹಲಂ ಚ ಚಷಕೇಽರ್ಪಯತ: ಕುಚಿತ್ತಾನ್
ಆನಂದಯತ್ಯನುದಿನಂ ಕರುಣಾಮೃತೇನ ॥ ೮೯ ॥

अस्यातुलप्रगतिमालोक्य केचित् मत्सरपूर्णचित्ताः स्वमनसि वर्तमानस्य विषस्य परिचयं वाणीद्वारा कारयन्ति । किन्तु कारुणामृतेनायं तानपि सन्तोषयतीति जगद्गुरोरुदारभावनां प्रकटयति ।

निन्दाकृतिर्यदि भवेन्मनुजो विशुद्धः
मात्सर्यवान् प्रगतिकारणमस्मदीयम् ।
विश्वैकबन्धुरगदद् बसवेश्वरो * यत्
तच्चेतसा स्मरति साधुजनप्रसिद्धः || ९० ||

ನಿಂದಾಕೃತಿರ್ಯದಿ ಭವೇನ್ಮನುಜೋ ವಿಶುದ್ಧ:
ಮಾತ್ಸರ್ಯವಾನ್ ಪ್ರಗತಿಕಾರಣ ಮಸ್ಮದೀಯಮ್ ।
ವಿಶ್ವೈಕಬಂಧು ರಗದದ್ ಬಸವೇಶ್ವರೋಯತ್
ತಚ್ಚೇತಸಾ ಸ್ಮರತಿ ಸಾಧುಜನ ಪ್ರಸಿದ್ಧ: ॥ ೯೦ ॥

निन्दाकरोऽस्मान् सदा जागरूकान् प्रमादालस्य रहितान् च करोति। अत एव कबीरदसो ब्रवीति निन्दकं निजाङ्गणे कुटीरे स्थापयतु। येनास्माकं स्वभावशुद्धिः सुलभा भवति। बसवेश्वरोऽपि एतदेव ब्रवीति यदनुसारं गुरुस्यं तैरेव निन्दकैर स्माकं प्रगतिः साध्येति मनुते ।

---

* मां ताडयन्ति यदि ते परिरक्षका मे
ये वापभाषणपरा मम वान्धवास्ते ।
निन्दन्ति येऽपि सततं पितरो ममैते
धिक् कुर्वतोऽपि मनुजान् नृपतीन्हि मन्ये ॥
ये वास्तुवस्ति ननु ते हितशत्रवो मे
श्री संगमेश नुतिरस्ति सुवर्णशल्यम् ॥

हालाहलं जलधिमन्थननिर्गतं तं
पीत्वा जगत्त्रयनुतो ननु नीलकण्ठः ।
मात्सर्यदुष्टमनसां वचनं विषाक्तं
श्रुण्वन् सदैव दयते सदयः सदोषान् ॥ ९१ ॥

ಹಾಲಾಹಲಂ ಜಲಧಿಮಂಥನನಿರ್ಗತಂ ತಂ
ಪೀತ್ವಾ ಜಗತ್ತ್ರಯನುತೋ ನನು ನೀಲಕಂಠಃ ।
ಮಾತ್ಸರ್ಯದುಷ್ಟಮನಸಾಂ ವಚನಂ ವಿಷಾಕ್ತಂ
ಶ್ರುಣ್ವನ್ ಸದೈವ ದಯತೇ ಸದಯಃ ಸದೋಷಾನ್ ॥ ೯೧ ॥

अस्यौदार्यं क्षमागुणं वीक्ष्य पौराणिक कथास्मरणं भवति– समुद्रमन्थननिर्गतहालाहलं पीत्वा शिवो नीलकण्ठः सन् जगत्त्रयवन्द्यो भवति। अयं मात्सर्यं पूर्णं मनसां वचनानि श्रुत्वा तानपि सदयं दयते।

दुर्भिक्षया च विकलाः सकला हि गावः
हन्यन्त एव नितरां हननप्रवीणैः ।
आखेटकैरनुदिनं जननीव पुण्याः
तत्पोषणं प्रकुरुते यतिराट् सदैव ॥ ९२ ॥

ದುರ್ಭಿಕ್ಷಯಾ ಚ ವಿಕಲಾಃ ಸಕಲಾ ಹಿ ಗಾವಃ
ಹನ್ಯಂತ ಏವ ನಿತರಾಂ ಹನನಪ್ರವೀಣೈಃ ।
ಆಖೇಟಕೈರನುದಿನಂ ಜನನೀವ ಪುಣ್ಯಾಃ
ತತ್ಪೋಷಣಂ ಪ್ರಕುರುತೇ ಯತಿರಾಟ್ ಸದೈವ ॥ ೯೨ ॥

वर्षा भावाद् दुर्भिक्षायां संजातायां जननीव पुण्याः सकलाः गावः कटुकैराखेटकैर्हन्यन्ते। अतः गोशाला प्रबन्धं कृत्वा तासां पोषणं कुरुतेऽयं यतीन्द्रः।

गत्वा विदेशमभवन्निदेशकीर्ति-
विस्तारकर्मनिरतो विरतः प्रशान्तः ।
श्रीवीरशैवमतवर्णितविश्वशान्ति
विख्यापयन् बहुमतो विदुषां समाजे ॥ ९३ ॥

ಗತ್ವಾ ವಿದೇಶಮಭವನ್ನಿಜ ದೇಶಕೀರ್ತಿ-
ವಿಸ್ತಾರ ಕರ್ಮನಿರತೋ ವಿರತ: ಪ್ರಶಾಂತ: ।
ಶ್ರೀ ವೀರಶೈವ ಮತ ವರ್ಣಿತ ವಿಶ್ವಶಾಂತಿಂ
ವಿಖ್ಯಾಪಯನ್ ಬಹುಮತೋ ವಿದುಷಾಂ ಸಮಾಜೇ ॥ ೯೩ ॥

अस्य विदेशयात्रा प्रसङ्गो न विहारार्थम्। किन्तु वीरशैव-मतोक्त विश्वशान्ति स्थापयन् स्वीयदेशकीर्तिविस्तारकर्मणि मग्नः भवति ।

वैदेश पण्डितगणेन निमन्त्रितोऽपि
वारं न वारमतिमूल्यविदेशयात्रा-
मग्नोऽ भवद् भरतदेशजनानुराग-
पात्रं यतो बसवकर्मरतिर्विरक्तः ॥ १४ ॥

ವೈದೇಶ ಪಂಡಿತಗಣೇನ ನಿಮಂತ್ರಿತೋಽಪಿ
ವಾರಂ ನ ವಾರಮತಿಮೂಲ್ಯ ವಿದೇಶ ಯಾತ್ರಾ-
ಮಗ್ನೋಽ ಭವದ್ ಭರತದೇಶ ಜನಾನುರಾಗ-
ಪಾತ್ರಂ ಯತೋ ಬಸವಕರ್ಮರತಿರ್ವಿರಕ್ತಃ ॥ ೧೪ ॥

विदेश पण्डितगणेना हूतोऽपि बहुधनव्ययकरां यात्रान करोति। बसवेश्वरकर्म समाजसेवां कुर्वन् जनतानुरागपात्रं भवति।

रोगप्रहारजडधीर्मनुजः शिवः स्याद्
इत्येव चिन्तनपरो जनतोपकारि ।
रुग्णालयं विरचयन्नुचितप्रवेशं
लोकोत्तरं प्रकटयत्य समानवृत्तम् ॥ ९५ ॥

ರೋಗ ಪ್ರಹಾರಜಡಧೀರ್ಮನುಜಃ ಶಿವಃ ಸ್ಯಾದ್
ಇತ್ಯೇವ ಚಿಂತನಪರೋ ಜನತೋಪಕಾರಿ ।
ರುಗ್ಣಾಲಯಂ ವಿರಚಯನ್ನುಚಿತಪ್ರವೇಶಂ
ಲೋಕೋತ್ತರಂ ಪ್ರಕಟಯತ್ಯ ಸಮಾನ ವೃತ್ತಮ್ ॥ ೯೫ ॥

रोगपीडितो नरः दीनो मनुज एव भगवानिति मत्वा तत्सेवा कर्तव्येति विचिन्त्य तेषां कृते उचित प्रवेशमेकं रुग्णालयं स्थापयति घटप्रभानगरे। डॉ. मोदी महोदयानां रुग्णालयः 'मानवसेवा देवालयः' (Temple of Humanity Service) इति नाम्ना लोकोत्तरं वृत्तं प्रकटयति ।

वर्णादिभेदनिरपेक्षमतिर्मतान्ध-
लोकोपदेशकृतदीनजनोपचारः।
स्वास्थ्यं समाज पुरुषस्य विचार्यं साधुः
नानोपकारसुखदो विमुखः प्रचारे ॥ ९६ ॥

ವರ್ಣಾದಿಭೇದ ನಿರಪೇಕ್ಷಮತಿರ್ಮತಾಂಧ-
ಲೋಕೋಪದೇಶ ಕೃತ ದೀನ ಜನೋಪಚಾರಃ ।
ಸ್ವಾಸ್ಥ್ಯಂ ಸಮಾಜ ಪುರುಷಸ್ಯ ವಿಚಾರ್ಯ ಸಾಧುಃ
ನಾನೋಪಕಾರ ಸುಖದೋ ವಿಮುಖಃ ಪ್ರಚಾರೇ ॥ ೯೬ ॥

वर्णादिभेदनिरपेक्षमतिरसौ मतादयन्धलोकोपदेशं कृत्वा दीन जनतोपचार निरतो वर्तते। अर्थात् समाजपुरुषस्य स्वास्थ्यं प्रति सदैव जागरूको भवतीति वक्तुं शक्यते।

संकीर्तनं च गिरिजारमणप्रयुक्तं
मोक्षैकहेतुरिति यत्कवयो वदन्ति ।
तत्सत्यमित्यनुदिनं हृदये विचार्य
शालां करोति शिवकीर्तनशिक्षणार्थम् || ९७ ||

ಸಂಕೀರ್ತನಂ ಚ ಗಿರಿಜಾರಮಣ ಪ್ರಯುಕ್ತಂ
ಮೋಕ್ಷೈಕ ಹೇತುರಿತಿ ಯತ್ ಕವಯೋ ವದಂತಿ ।
ತತ್ ಸತ್ಯಮಿತ್ಯನುದಿನಂ ಹೃದಯೇ ವಿಚಾರ್ಯ
ಶಾಲಾಂ ಕರೋತಿ ಶಿವಕೀರ್ತನ ಶಿಕ್ಷಣಾರ್ಥಮ್ ॥ ೯೭ ॥

कीर्तनकला शिवगुणकीर्तनेनैव सफलीभवति। भक्तिप्रियः शंकरः नादवेदज्ञानेन केवलं न तुष्यतीति बसवेश्वरोऽपि ब्रवीति। अतः शिवकीर्तनशिक्षणकृते कीर्तनशालामेकां स्थापितवान्।

अध्यात्मशक्तिकृतमानवभूति चिन्तः
शालादिभिः सकललोकसुखानुभूतिः ।
रुग्णालयादिकृतदुखितचित्तशान्तिः
लोकैकबन्धुरिव भाति यतिः प्रशान्तः || १८ ||

ಅಧ್ಯಾತ್ಮಶಕ್ತಿ ಕೃತ ಮಾನವಭೂತಿ ಚಿಂತಃ
ಶಾಲಾದಿಭಿಃ ಸಕಲಲೋಕ ಸುಖಾನುಭೂತಿಃ ।
ರುಗ್ಣಾಲಯಾದಿ ಕೃತ ದುಃಖಿತ ಚಿತ್ತ ಶಾಂತಿಃ
ಲೋಕೈಕ ಬಂಧುರಿವ ಭಾತಿ ಯತಿಃ ಪ್ರಶಾಂತಃ ॥ ೧೮ ॥

पाठशालारुग्णालयादिस्थापनं कृत्वा लोकोपकारनिरतोऽयं जगद्गुरुः लोकबन्धुरिव भातीति सकलवेद्यम् ।

श्रीरुद्रपूर्वमुनिरप्रतिमप्रभावः
विद्यानुरागरसिको विनयस्वभावः ।
यं सेवते प्रतिदिनं शरणैकनिष्ठः
गङ्गाधराब्जचरणानतिपूर्णतुष्टः || ९९ ||

ಶ್ರೀ ರುದ್ರ ಪೂರ್ವಮುನಿರಪ್ರತಿಮ ಪ್ರಭಾವಃ
ವಿದ್ಯಾನುರಾಗ ರಸಿಕೋ ವಿನಯಸ್ವಭಾವಃ ।
ಯಂ ಸೇವತೇ ಪ್ರತಿದಿನಂ ಶರಣೈಕನಿಷ್ಠಃ
ಗಂಗಾಧರಾಬ್ಜ ಚರಣಾನತಿಪೂರ್ಣತುಷ್ಟಃ ॥ ೯೯ ॥

श्री मूरुसाविर मठीय जगद्गुरुपदोत्तराधिकारे नियुक्तः श्रीरुद्र-मुनिदेवः विद्याविनयसंपन्नः शरणमार्गानुयायी गुरुचरणसेवा धुरन्धर इति महद् भाग्य मठस्य ।

षष्ट्यब्दिपूर्तिविलसन्मुखमण्डलोऽपि
तारुण्यतीक्ष्णबलतः कुशलोऽ प्रमत्तः ।
योगादिसंचितबलस्य जरातुरत्वं
दृग्गोदरं भवति नैव वयोऽनुरूपम् || १०० ||

ಷಷ್ಟ್ಯಬ್ಧಿಪೂರ್ತಿ ವಿಲಸನ್ಮುಖ ಮಂಡಲೋಽಪಿ
ತಾರುಣ್ಯ ತೀಕ್ಷ್ಣಬಲತಃ ಕುಶಲೋಽಪ್ರಮತ್ತಃ ।
ಯೋಗಾದಿ ಸಂಚಿತ ಬಲಸ್ಯ ಜರಾತುರತ್ವಂ
ದೃಗ್ಗೋಚರಂ ಭವತಿ ನೈವ ವಯೋಽನು ರೂಪಮ್ ॥ ೧೦೦ ॥

षष्टिवयोमानस्यापि जरातुरत्वं वृद्धत्वं वा न दृष्टिपथमायति। अर्थात् योगादिलब्धबलास्यास्य तारुण्यमधुनापि न नश्यतीति भणितुं योग्यम्।

पश्येदयं हि शरदां शतमात्मतुष्टः।
पाण्डित्यपूर्णहृदयः कविताप्रहृष्टः
शम्भुप्रसादविमलो बसवैकनिष्ठः
लोकोपकाररसिकः सुधियां गरिष्ठः ॥ १०१ ॥

ಪಶ್ಯೇದಯಂ ಹಿ ಶರದಾಂ ಶತಮಾತ್ಮ ತುಷ್ಟಃ
ಪಾಂಡಿತ್ಯ ಪೂರ್ಣಹೃದಯಃ ಕವಿತಾ ಪ್ರಹೃಷ್ಟಃ ।
ಶಂಭು ಪ್ರಸಾದ ವಿಮಲೋ ಬಸವೈಕ ನಿಷ್ಠಃ
ಲೋಕೋಪಕಾರ ರಸಿಕಃ ಸುಧಿಯಾಂ ಗರಿಷ್ಠಃ ॥ ೧೦೧ ॥

आत्मतुष्टः पाण्डित्यपूण मनस्कः शिवकारुण्य विमलः शरणमार्ग निष्ठोऽयं सुधी लोकोपकार निरतो वर्तते इति भागधेयमस्माकम् ।

— श्लोकानुक्रमणिका —

श्लोकादि:	पृष्ठ संख्या	श्लोकादि:	पृष्ठ संख्या
अर्थं विना	59	तस्मिन्	4
अल्पे वयस्य	22	तज्जीर्णं	23
अव्यक्तरूप	61	तेषां कृते	46
अस्य द्रुत	89	तेष्वेव	7
आचार्यं	82	दारिद्र्यपीडित जनस्य	25
आध्यात्म	98	दारिद्र्य पीडितसमाज	29
आरुह्य	88	दुर्भिक्षया	92
आंग्लादि	19	देशोन्नति	32
इत्थंविचिन्त्य	52	धर्मप्रचारण	40
इस्लाम	64	धर्मप्रजागरण	78
उद्योगहीन	43	धर्मेण मानव	67
एतद्विचार्य	65	नानाविधा	47
कारुण्यपूर्ण	71	निन्दाकृति	90
कालक्रमेण	85	नैव स्वयं	56
काव्यादि	36	पंचाशताब्द	80
काशीं गतो	13	पश्चाद्	8
गत्वा विदेश	93	पश्येदयं	101
गीर्वाणवाक्	14	पाण्डित्यपूर्ण	20
ग्रन्थालय:	28	पूजादिके	81
ग्रन्थश्यं	84	पूर्णज्ञ	87
चित्तेसदा	16	प्रान्तीयवाक्	51
छात्रानुकूल	33	बाल्ये यत:	12
जातिप्रभाव	30	बाल्ये सुसंस्कृत	45
जात्यन्धधूर्तं	72	भव्यं न	6
जीर्णं मठं	26	यं धर्मसार	68

श्लोकादिः	पृष्ठ संख्या	श्लोकादिः	पृष्ठ संख्या
यद् वा पुरं	43	शम्भुप्रसाद	39
यन्मन्दिरं	37	शुद्ध क्रियासु	60
यल्लीलया	2	श्रीचित्रगी	11
यः पण्डितः	86	श्रीचित्रगी	17
यः शिक्षितः	31	श्रीमूरुसाविर	34
यश्चात्म	18	श्रीरामकृष्ण	24
यस्मिन्	3	श्रीरुद्रपूर्व	99
या संस्कृति	41	श्रीवीरशैव	77
येनाप्रबुद्ध	35	श्रीवीरशैव	21
योऽप्यत्र	38	षष्ट्यब्दि	100
रामेति	62	संकीर्तन	97
राष्ट्रीय	42	संगीत	54
रोगप्रहार	95	संपद्भर	10
लिङ्गाङ्गिनामपि	79	सर्वेऽपि	73
वह्निप्रदीप्त	70	सर्वोदयं	74
वर्णादिभेदन	96	सारस्वतेन	66
वर्णाश्रमादि	5	साहित्यगीत	53
वाणिज्य	9	साहित्यनिर्मिति	15
वाराणसी	48	साहित्यनिर्मिति	76
वित्तादिलोक	44	साहित्यराशि	57
वित्तादिहीन	27	साहित्यसृष्टि	55
वेदान्तादिषु	1	स्वर्णाक्षरश्च	75
वेदान्तशास्त्र	58	स्वातन्त्र्य	49
वैदेश	94	स्वार्थैक	83
वैरं निसर्ग	69	हालाहल	91
वैविध्यपूर्णं	50		

— शुद्धिपत्रम् —

पृष्ठ संख्या	पङ्क्ति संख्या	अशुद्ध	शुद्ध
27	5	ಕಾಣೇಮಂ	ಕಾರಿಣೇಮಂ
27	8	ಪನ್ನ	ಪ್ರಸನ್ನ
34	6	ಸಂಪದ್ಯರೋ	ಸಂಪದ್ಭರೋ
34	8	ವಗ್ನೋ	ಮಗ್ನೋ
35	7	ಆತ್ಮೇನ್ನತಿ	ಆತ್ಮೋನ್ನತಿ
50	1	बिम्भके	बिम्बके
52	4	संस्कति	संस्कृति
59	9	विर्थेनान	विनार्थेन
65	6	ವಿನವರ್ಾ:	ವಿನಮ್ರಾ: